भवतीति भावः भेदे पृथक्प्रयोगे क्रियमाणे याः कोदातन्मूलको यः संसर्गः परस्परमन्वयः स्तदर्थः भाष्योसंगतिः स्पष्टैवेति
इदमयुक्तं तद्धितान्ततत्प्रयुक्तप्रातिपदिकसंज्ञायास्तदादिनियमाश्रयणेप्यर्थवत्सूत्रेणैतस्याऽदर्वारत्वात् किं च तदादिनियमा
भावे देवदत्तो गार्ग्य इति समुदायस्य तद्धितान्तत्वेन प्रातिपदिकत्वमापादितं भाष्ये तदानीं च समासग्रहणस्य नियमार्थत्वे समासस्य

प्रत्ययान्तत्वात् तदादिनियमस्यत्वाभावात् किन्तु विपर्ययमेव तथा च देवदत्तो गामपैति समुदायस्य सुप्युपपन्नं प्रातिपदिकत्वापादाने
द्वि॰ किंच कुम्भकारेत्यादिसमासे उत्तरभागस्य स्वातन्त्र्येण प्रयोगार्हत्वाभावेन शुक्लीकृत्येत्यादौ कृभ्वस्तियोगे च्वेः साधुत्वात् कृभ्वस्तिं विना शु
५१ क्लीत्यादिपूर्वभागस्य स्वातन्त्र्येण प्रयोगार्हत्वाभावेन बहुपट्वित्यकैकमित्यादेरिति दिक् समासत्वमाश्रित्य प्रातिपदिकत्वस्य वक्तव्यतया तद्वट
51 कपूर्वोत्तरभागयोः स्वातन्त्र्येण प्रयोगार्हार्थवत्त्वाभावेन च स्वातन्त्र्येण प्रयोगार्हार्थवत्त्वोत्तरभागकत्वेन समासमात्रे स्तीति समासमात्रत्वे
न नियमशरीरे नायं धर्मः प्रवेष्टुं शक्यः एवं च गवयनद्यादिसमासे पंच गावेति पूर्वभागस्य न स्वातन्त्र्येण प्रयोगार्हत्वं किंचैयामासमूल-
केनोपदेशा इत्यादिवाक्येऽर्थवत्त्वेन प्रातिपदिकत्वेऽङ्गीकारे यथा मासेत्यनयोः परस्परपरिहारेणापदेशा इति तस्य मूलकेनेत्येतत्परिहारेण
प्रयोगार्हत्वाभावेनोक्तनियमेनाव्याहतेः तस्मात्षष्ठीनिर्देशादिभिर्यैस्समवेतानां समासा विहितास्तदेकवाक्यतापन्नं यत् कृत्तद्धितसमा-
साश्चेति तत्समवेतानां समुदायस्य समाससंज्ञानियमपरं तेन नीलो घट इत्यादेः समुदायस्य प्रातिपदिकत्वाव्याहतिः नचैवं गवित्यय-
माहेत्यादौ दोषः गवित्यस्य प्रातिपदिकत्वेऽपि तत्त्वस्याभावात् गवित्ययमिति समुदायस्य तत्समवेतसमुदायत्वेनैव वारणात् देवदत्तो गवि
त्याहेत्यत्र तु देवदत्तो गवित्यस्य न प्रातिपदिकत्वं परस्परानन्वयेनानर्थकत्वात् अनुकार्यानुकरणयोर्भेदविवक्षाया अवश्यमाणत्वेन गवि-
त्यस्य समवेतस्यासाधुत्वाच्च नन्वेवमपि हरचरहनिति समुदायस्य प्रातिपदिकत्वेऽङ्गीकारे समवेतसमुदायत्वाभावेनोक्तनियमेनाव्याहतेरि ५१

तिचेन्न जहि कर्मणेत्येतदेकवाक्यतापन्नेनानेन सुप्तिङन्तसमुदायस्यापि प्रातिपदिकत्वनियमनात् नन्वेवमपि पचति भवतीत्येतत्स
मुदायस्य प्रातिपदिकत्वे ऽडर्वारे ऽक्तनियमद्वयाविषयत्वादिति चेन्न आख्यातमाख्यातेनेत्येतदेकवाक्यतापन्नेनानेन तिङन्तसमुदायस्या
पि प्रातिपदिकत्ववारणात् तदेतदभिप्रेत्याख्यातवत्सूत्रे भगवता भाष्यकृतोक्तं तुल्यजातीयस्य नियमो यथाजातीयकानां च समासः सुबन्ता
नां च समासः सुप्तिङ्समुदायस्य तर्हि प्राप्नोति सुप्तिङ्समुदायस्यापि प्रातिपदिकसंज्ञाऽऽरभ्यते जहि कर्मणेति सा नियमार्था भ
विष्यति तिङ्समुदायस्यापि तर्हि प्राप्नोति तिङ्समुदायस्यापि प्रातिपदिकसंज्ञाऽऽरभ्यते आख्यातमाख्यातेनेति सा नियमार्था भ
विष्यतीति नन्वेवमपि देवदत्तस्य पुत्र इत्यत्र पुत्र इत्यस्य ओदनं पचतीत्यत्र ओदनं पचतीत्यस्य ओदनं पचेत्यस्य आज्ञां गमयतीत्यत्राज्ञां गमो
त्यस्य प्रातिपदिकत्वं स्यात् न चाद्ये विभक्तीतरदेवदत्तेत्यपेक्षया चैतत्संज्ञा फलभूतविभक्तीतरतिङपेक्षयार्थबोधकत्वेनैतत्संज्ञे
त्यार्थवत्त्वाभावान्न प्रातिपदिकत्वमिति वाच्यं ईदृशार्थवत्त्वस्य भवद्भिरनङ्गीकारात् एवं भूतत्वायामित्यस्य प्रातिपदिकत्वे ऽडर्वारम् भ
स्मेत्यस्य सुप्तिङन्तभिन्नत्वेनोक्तनियमद्वयाविषयत्वात् एतेन कटं कुर्वाणमित्येतदेकवाक्यतापन्नेन कृत्तद्धितेत्यनेन यावत्सुबन्तस
मुदायस्यापि पदमतिङ्स्येतदेकवाक्यतापन्नेन चानेन सुबन्ततिङ्भिन्नप्रत्ययान्तसमुदायस्य प्रातिपदिकत्वनियमान्न दोष इति परा
स्तं देवदत्तस्य पुत्र इत्यादौ दोषानिवारणाच्चेति चेत्सत्यं प्रकृतिप्रत्यययोरन्वयव्यतिरेकाभ्यां पदवाक्ययोश्च लोकेऽर्थबोधजनकत्वेनह

वि. ५२
52

तिकल्पने पि स्यु ऊ व इत्यादे स्तत्कल्पने मानाभावेन हलाऽर्थे योग्यताभावादेवादोषात् कदम्बूपाचकतं भकारादौ तत्समर्थः पदविधिरिति शा
स्त्रप्रामाण्यादेव हलिमते उपपदमतिङिति तदेकवाक्यतापन्नेन कृतद्धितेत्यनेन सर्वेत प्रातिपदिकसमुदायस्य प्रातिपदिकत्वनियमना
स्त्तनस्पुसतायामित्यत्र दोषः भेदविवक्षयाम् इत्यस्य प्रातिपदिकत्वविदेशान्नुत्पत्तिर्नैत्ययत् कदम्बइत्येतदेकवाक्यतापन्नेन याने स
र्वेत समुदायस्य प्रातिपदिकत्वनियमनाच्च प्रकृतिवदनुकरणमिति इत्यस्यापि धातुत्वात् प्रत्ययवस्यवन्तत्वात्तिः नियमत्रय प्रदर्शन
परंभाष्ये तत्पलक्षणेन न्वेवमपि पचति पचतितरामिति द्विर्वचनान्तरपि तिङंतसमुदायस्ते न नियमव्यावर्त्यापातः पर्वोक्तिभागव
तरत्यस्यापि निपमव्यावर्त्यापातः सर्वेत समुदायमत्वादिति चेन्न तिङंतसर्वेत मात्रवदितसमुदायस्यैव तेन व्यावर्तनात् एतेन प्र
त्ययांतानो समुदायस्य चेत्प्रातिपदिकत्वेताहि समासस्यैवेत्येकयव नियमोस्तु कृत्तेनियमोस्तु कृत्तुत्रयेणेत्ययास्त प्रत्ययांत मात्रव
टितेति परिष्कारासंभवेनोक्तस्थलेपाचकिरित्यादौ वदोषापत्तेः नच प्रकृतिप्रत्ययभावापन्न समुदायविषयकत्व कृत्यैवनियमोस्त्वि
तिवाच्यं पचतितरामित्यत्रातिव्याप्तेः तरामित्यस्याप्रत्ययत्वात् यदि च प्रकृतिप्रत्ययभावानापन्नोयावयवं वेता वित्वयतेतदापि पचति ग्रा
मितिभागद्वयत्रातिव्याप्तिः उक्तभागद्वयस्य प्रकृतिप्रत्ययभावानापन्नत्वात् ग्रामास्तिङंता प्रकृतिकतात्त्कयोवितत्रातिव्याप्तिवार
णे उक्तयमेद्वयस्य समासमात्र हत्तितासंभवः बहुखट्वक इत्यादिसमासे शर्वोत्तरभागयोः कबहुखट्वइत्यनयोः प्रकृतिप्रत्ययभावा ५२

पन्नत्वात् कथं समासान्तावयवत्वेनकोक्तस्य समासत्वात् भागवतशिवेत्यनयोः प्रकृतिप्रत्ययाभावानापन्नत्वाद्दर्थवत्त्वाच्छिवभा
गवतादृत्यस्य नियमव्यावर्त्यतापाताच्च नन्वेवमपि राजकुमारीश्रितइत्यत्र युगपद्वृत्तिद्वयपदे प्रातिपदिकत्वानापत्तिः सुबेन मात्रसमु
दायसत्त्वादिति चेन्न युगपद्वृत्तिद्वयोऽन्तरे राजकुमारीत्यस्य समासत्वात्प्रातिपदिकत्वेन पुनः सुपि पुनर्ङितीपातनरूपणदोषात् श्रिते
त्यस्य प्रत्ययलक्षणेन सुबन्तत्वाऽन्तरे पदे चेति निषेधस्य पदान्तविधावेव प्रवृत्तेः केचित्तु नियमस्य सामानाधिकरण्यसमाससंज्ञा
श्रयाघटितसुबन्तसमुदायविषयकत्वान्नोक्तदोष इत्याहुस्तन्न राजकुमारीश्रितस्य पुत्रइत्यादिवाक्ये प्रातिपदिकतापत्तेः उक्तद्वयाश्रयघ
टितसमासत्वानाश्रयघटितत्वोभयाभावविशेषेऽपि राजकुमारीश्रितस्य सेवकइत्यादिवाक्ये प्रातिपदिकतापत्तिरिति दिक् उक्तद्वयाश्रयघटितत्वैका
र्थीभावघटितसामानाधिकरण्योभयाभावविशेषेण संभवति राजकुमारीश्रितपुत्रेतदभावात् राजकुमारीश्रितो मूलकेनोपदंशमि
त्यादौ दोषाच्च अत्र कुमारीश्रितशब्दादेव सुबुत्पत्तिरित्यपि केचित् ननु शशशृङ्गादिसमासे शशशृङ्गादेरलीकत्वेनानर्थकत्वात्प्राति
पदिकत्वाप्राप्तौ समासग्रहणं विध्यर्थमेवास्यान्न नियमार्थमित्याशंक्याह शशशृङ्गादिपदानामिति विशिष्टस्यादिवित्तस्यानवहि
त्वेकदा च न स्वप्नभ्रमसदोषेषु सर्वैरेवानुभूयतइति कौर्मस्तेरनादिवासनारूपेणान्तरवच्छिन्नरजतादेः कामादिहानिसहकारे
णवहिर्विषयप्रदेशेप्याग्मेस्याकारेण विषयभासनेचनतद्वाध्यः कोपि विषयस्य विशेषाकारोऽस्ति नवसौत्रान्तिकमतप्रवेशः ते

समाविष्टं वस्तु वाच्यं स्यात् ततो व्यक्त इत्यस्मात् सत्ताब्रमादिति इत्यस्य गतार्थत्वात् प्रयोगो न स्यात् नातिकि स्य च तत्ता २

वि॰ ५२ 53

ततत्रारोपितमत्तायाभ्रप्यनेगोकारादितिभावः तडक्तं तदस्यास्त्यस्मिन्निति सूत्रेण सत्तापदार्थो व्यभिचरतीतिभाष्यव्याख्यावसरे कैयटे यदित्थंत्वादिना वास्तसत्तोविरोधात्प्रयोगाप्रसंगः अङ्कुरोजायते इति च प्रयोगो न स्यात् सतोजन्मविरोधात् बौद्धसत्तायोगे नेदोषा नावतरेति बुद्धिसमासमाविष्टस्य वहिः सत्तासत्त्वजनन प्रतिपादनायास्ति नास्ति जायत इति प्रयोगादिति नन्वलौहित्याद्यैसमासे स्वातंत्र्यप्रयोगाद्धार्थवत्समुदायत्वेनविधेयतेतदवयवानां निरर्थकत्वादित्याशंकते अलौहित्यादीति अन्यत्रटहार्थारोपितेति प्रातिपदिकत्वसिद्धयेऽर्थवत्ताऽरोपस्यावश्यकत्वात तस्य च समासेऽर्थवत्समुदायत्वेऽपाद्यमिति भावः विकारागमेतिपाठः पवर्गेमेपि तमुच्चार्यैति अर्थबोधकशब्दसमुच्चार्येत्यर्थः नभवयाद्यादेशानामितिनाभिनभेव हनश्वयः आदियडाद्विरागविरेंगवे॰ त्यस्येग्रहः अमकजिति अमिप्रत्ययाताभावे शकारस्येत्त्वे ज्ञानस्यात् अकवितदभावे सार्वकेत्याद्यावितेनस्यात् बहुवित्वफले विते इतिदिगिति अन्येनत्वग्णहइतिनिर्दिश्यात्यत्ययपरताभावेपि प्रत्ययइत्यस्योपस्थितिः बहुवित्वप्रत्ययत्वस्यनफले अव्ययसर्वनाम्नामित्यत्रापिप्रत्ययइत्यस्यसंबंधः नयासयोरितिज्ञापकात् एवंचयत्रागमकेतत्रपरत्वेत्येतत्संनियोगशिष्टत्वे प्रत्ययइत्यस्यासंबंधः आनुदात्तत्वेत्यनेनततनसंनियोगशिष्टत्वे विप्रकृष्टत्वात् तेनाकिंविजादेःप्रत्ययसंज्ञासिद्धिः किंचैत्याद्युक्तमपिदूषणम् देशांशेतिराकांततेपिपरत्वेत्यस्यसंभवमात्रेणसंबंधसंभवः विकारागमयोस्तुपंचम्यंताभावेनान्वयासंभवात्परत्वेत्यस्यानुपस्थिति ५३

नच सोरुदात्तव्यवधानाद्वानोः परत्वासंभवः यास्सुट्परस्मैपदेष्विति सूत्रारंभसामर्थ्येनागमातिरिक्तकृतव्यवधानाभावस्यैव परशब्दार्थ
त्वात् इतरथा सीयुट्श्च यास्सुटोपि पूर्वं ग्रहस्यापरस्मैपदविषयाभावात् तदसंगतिः किंच स्थानिनः प्रत्ययत्वनिर्णयेन परश्रुतस्या
से वेये पि प्रत्ययत्वस्य न तस्मैनियोगशिष्टाद्युदात्तश्रुत्यत्वसंबंधः किंच परश्रुत्यस्याग्रहणावपि स्थानिवद्भावलभ्य प्रत्ययसंज्ञा
संनियोगेनाद्युदात्तत्वोपपत्तिः तदेतदभिप्रेत्य भगवता भाष्यकृतोक्तं विकारागमेषु च परत्वविज्ञानात्प्रत्ययसंज्ञा न भविष्यति प्रत्य
यः परो भवतीत्युच्यते नच विकारागमाः परे संभवन्तीति प्रकृत्यर्थमात्रविवक्षायां सिद्धावस्थापविवक्षायां ङ्याप्प्रातिपदिका
त् तिङन्ताविति पश्य मृगो धावतीत्यादौ तिङन्तताचेति ननु धावतीति तिङः कर्तृगतसंख्याभिधायित्वेन कर्मगतेति चेन्न या
स्कार्वार्यमते तिङर्थे कर्तृसंख्याविशेषकशाब्दबोधस्याप्यंगीकारात् यद्वा तिङन्तात् द्वितीया पाद्यमाना किं प्रधानक्रियागतैक
त्वमादाय उताहोस्वित् अप्रधानक्रियागतसंख्यायाव्याप्तविशेषणकर्त्रादिगतैकत्वमादाय प्राथे संख्याभावादित्युभयरे द्वितीयेति तिङन्त
त्वाच्चेति यावन्न कर्तुरेव दर्शने कर्मत्वात्कर्तृगतसंख्याया अभिहितत्वे कर्मगताया अपि तस्या अभिहितत्वमिति भावः यावन्न कर्तुरेव द
र्शने कर्मत्वात्कर्तृगतसंख्याया अभिहितत्वे कर्मगताया अपि तस्या अभिहितत्वमिति भावः तदेतदभिप्रेत्य भगवता भाष्यकृतोक्तम्
तिङन्तादेकत्वाद यद्यपि तिङन्तात्स्वादयो भवन्तीति यद्यपि पचति भवतीत्यादौ प्रथमाया अप्युपादानसंभवः तथापि प्रातिपदिके

वि॰ ५४ 54

त्यापेक्षवाक्यात्तथैव स्वादिसूत्रस्य विधायकत्वेन तिङ्. तस्य प्रातिपदिकत्वाभावेन प्रातिपदिकार्थाभावात् प्रथमानापाद्यपि नेत्यत आह त्या
श्रयेन द्वितीयादिविभक्ते केचित्तु व्याख्यायां कर्मणि द्वितीयेत्यस्य प्रथमस्य पादानात् तयोः क्रियात्मकः तेभ्यः तिङ्. तेभ्यः प्रथमो द्वारि
तद्बोध्यादिति तस्यापत्यमित्याद्यर्थबोधकशास्त्रेषु प्रथमोपात्तयत्तसेत्यादितद्धितायउपस्वादिसंबंधस्तद्बोधकपत्नेउपगुङ् स्
इत्यादितस्मादित्यर्थः प्रथमानाम्निर्दिष्टं इदमुक्तं समर्थादिति सूत्रे तमेव विशेष्यतया प्रोक्तो तेन नत्वन्यत् ह्यर्थोहि विशेष्यतयासंभा
वनायामन्यतरस्यत्वात् निश्चयायैतत्प्रमाणमुक्तः ननु सर्वशब्दोप्याद्युदात्त एव स्वाङ्गशिटामदन्तानामिति सूत्रेणान्तत स्व
प्रातिपदिकादित्युक्तादोषस्तदवस्थ इत्यत आह सर्वशब्दस्येति कौस्तुभोक्तेरुषयित्नुप्रत्ययस्येति नवेति लुङ्. निमित्तप्रत्य
यादिति सन्नायोरुक्तश्च तदुपजीव्यस्य कार्यस्यापि प्राबल्यबोधक इति भावः सौवरीणां स्वरविधायकशास्त्रभवानां स्वरशा
स्त्रात्र भव इत्याणि द्वारादीनां चेत्यैजागमः आद्युदात्तमसिद्धिरिति नन्वेवं सतिसर्वस्यस्वपीत्यत्रस्वपीतिवंशे स्यादिति चेन्नत्वे
किमस्माभिः कर्तुं शक्यं सर्वशब्दादावा रक्षिपितिपि वाद्युदात्तताभावार्थं वास्यात् प्रातिपदिकाधिकारेत्तु तस्यान्तोदात्तादिति
विशेषणे विशिष्टस्य गम्भीरायां न पर्यवोषश्चादाविव समर्थादित्यनेनान्वयार्थे तत्त्वक्तनिकेलक्षणयामन्तोदात्तादिति प्रातिपदिक
प्रकृतिकषष्ठ्यन्तादित्यर्थे न क्षिडे सार्वध्रुमन्त्रानतापतिः षष्ठ्यामन्तोदात्तादिप्रकृतिकत्वात् षष्ठ्युत्पत्तिसमये सर्वशब्दस्यान्तो ५४

दानत्वात् एवंच सर्वेस्सस्यपीनत्रसपीत्यपिसार्थकम् उंछादिषुपाठः सफलः सर्वेशस्तत्राजग्रहणेन भयफलत्वात् मानाभावादिति
अनुदात्तादेरित्यस्य षष्ठ्यंतविशेषणत्वसंभवादितिभावः नलक्षणेति इदमयुक्तम् तथासतिसार्वधातुकत्राजन्तापत्तेः सपिपरेसर्वस्य
सपीत्यस्य ग्रहणात्सर्वेति प्रातिपदिकत्वस्यानुदात्तादित्वाभावात् ममत्वसुपः पूर्वमनुदात्तादित्वेनानुदात्तादिप्रकृतिकषष्ठ्यंततत्व
स्यतत्रसत्वेनात्रसुलभः किंच पदादेः रूपकविधिताभावेन समर्थपरिभाषागौणमुख्यन्यायश्चतद्धितविधौ नापतिष्टेयातो अधि
कमग्रेवक्ष्यामः प्रातिपदिकग्रहणस्य प्रयोजनांतरमपि भाष्योक्तं किंचित्प्रदर्श्यते अवयवनिनिवाचातरतीत्यत्र प्रसज्येत वृते
नतरतीत्यत्रवचनस्यात्समर्थस्यैवेतस्यायेद्युकत्वात् द्वितीयेतदभावात् नोग्रहणेन नियमार्थस्यात् बहुतरोदाहरणेति सर्वे
नाम्नस्तृतीयाच भवत्याहतोः कुसूलकूपकुंभशालेबिले कुसूलीबिले पूर्वेसदृशसमोना पित्रासदृशो तथाप्ययमोऽस्ति
आनुपूर्वी विशेषभित्यसपीत्यर्थः अतएवानुपूर्वीविशेषव्याप्ययमोऽणमप्यातिदेशदेवानयेतानोयोबहुव्रीहिरिति ननुनयेतत्सर्वो
वयवकोयोबहुव्रीहिरित्यर्थे बहुकुमारीकइत्यत्रकवनापत्तिः नयेतावयवकइत्यर्थेकुमारीभार्याइत्यत्रातिप्रसंगाइतिचेत्र नपु
तरपदकइत्यर्थेनादोषात् अवयवविषयएवेति महाराज्ञीत्यादिसमासावयवराजन्शब्दविषयएवेत्यर्थः तथाच समासघट
कराजन्शब्दत्वादिकमेवसमासांतविधावनयापरिभाषयानातिदिश्यते बहुव्रीहित्वादिकं तु निदिश्यतएवेतिभावः इतिचरितार्थे

स्वार्था वान्त तद्धि नस्र स्तेत द्वितं विपक्षा पांधितेक त्वपोद नतेत रभी वाक्ये नतद्धि तां नस्यपदस्य कैयट क्त

मिति तथावार्थिकेत्यत्रनेन विकल्पः अत्रं तन स्वार्थिकेषु उत्पाप्युग्रहणासंबंधेनायः एवं मेव कयः प्रहते: किंतु नित्यमेवेत नवेवं सति उत्पा संगम एवे

वि॰ प्युग्रहणा वैयर्थ्यं अत्र तन स्वार्थिकानामेतत्रेगतेन परत्वेन षड्गाबूभ्यांशागे वोत्पत्तेः कुत्सितार्थेकतद्धितानोत कुत्सित उतिसूत्र स्थ भाष्यो पर ८

५५ 55 करीत्या स्वार्थादिप्र युक्त कार्याणां क्रमिकत स्वीकारेण न्यायतत्य वस्था वेना उत्पत्ति सिद्धेरिति वाच्यं लिंगविशिष्टपरिभाषायाश्च नित्यत त्वा

पनार्थतात् तेन समासान्तादि विधौ लिंगविशिष्टपरिभाषाया अप्रवृत्तिः नन्वत्यंत स्वार्थिकेषु उत्पाप्युग्रहणासंबंधे पिचकालत नेषिति त्वा

पकेन नतद्धितानां सुबेतादेवोत्पत्त्या लोहिताल्लिंगबाधनं वेति पुनरसंगतमित्यत आह अत्यंतस्वार्थिकानामिति अत्रेतर्भावादितिपत

उमरस्र त्रेतस्येति शेषः तस्य वहिर्वेवना भाव रत्वेनेनान्वयः इदं वो कार्योनामिति न्यायमनन्तुसंधायप्रवृत्तं एकवतेस्रीतेवोत्रतार्थः

तयुक्त स्यचावो सितता न्तवुन्तेतसहितमित्यर्थः विभक्त्यभावेनेति अत्यंतस्वार्थिकानां सुब्रुत्पत्तेः एवं मेवोत्पत्तेरिति भावः नन्वेत

द्भाष्ये सुबेतानतद्धितोत्पत्ता वप्युपपन्नम् नित्यताद्बुनिग्रकादेशेच भतेनपदंचेराह प्रयोगादि निस्लेवरति अधिकस्यापेक्षत्वेनेति उ

न्नणेत तद्रूपविशिषापेक्षत्वेनेत्यर्थः नवसुबेत द्वयसापेक्षस समासापेक्षयेके सुबेता पेक्षाणा प्रत्य यस्यैवांतरंगत्वमितिवाच्यं एत

द्भाष्य शामाण्ये नपदद्व यसापेक्षादपि विशेषापेक्षस्य वहिरंगतात् उक्तरीत्यैवेति सामान्यापेक्षत्वेनेत्यर्थः उक्तदिशापदद्व यापेक्ष

त्वे पि समास स्याणापेक्षयांतरंगत्वे वोध्यं मत्वन्तविस्तरइति स्पष्टं चेदं सर्वमत्र त्य भाष्य कैयटयोः नत्र हि स्याप्युग्रहणास्य कालितेरे ५५

नादिप्रयोजनमुपन्यस्यन्नस्य बहुगोमकेत्यादौ दोषमुद्भावहि प्रथमयोरपि स्वार्थिकः समासान्तो ह्यपि स्वार्थिकः समासान्तो ह्यपि स्वार्थिकात्
त्परत्वात्समासान्ताभविष्यतीत्युक्ते कालिकेत्यादौ हि प्रत्ययात्पूर्वं परत्वादनेन स्वार्थिके कनि प्रत्यये स्यादिति तेन न सिद्धिः लोहिनीकेः
ति तु लोहिताल्लिङ्गबाधनेवेति वचनेन न सिध्यतीत्युक्ते भाषिकैः पदैकस्या ग्रहणप्रत्याख्यानेन समासान्ते परिहारः कालितरेत्यादौ तु पूर्वो
क्तन्यायेनोत्तरेणात्वात्स्त्रीप्रत्यये प्रकर्षप्रत्यये इत्युक्ते एवं चान्येन स्वार्थिके कनि श्वाप दितिमार्येकेत्याप स्याध्येव तत्रतत्रेति दाडःसोत्या
दौ विभक्तिश्च ननु ङीप्रणीत्यनन्तवत्तेतङ् एतन्मात्रान्तु हतो विभक्तिपदे नैकक प्रत्ययग्रहणात्प्रथमयोरित्यादौ षण्णां ग्रहस्या
नो ग्रहणं न स्यात् किं तु द्वयोरेव ततश्च सोरजादित्वाभावेनौजसोरेव ग्रहणं स्यादित्याशङ्क्याह प्रथमयोरिति बहुवचनापत्तिरिति द्योः
केषितिस्यादिति भावः एतत्सहितानां हितायामिति सत्येकैकं पदव्याख्यावसरे द्वेकेषामिति स्यादित्याभिनवविवरणोक्तेतद्भसान् हंहे वे
तिनिषेधेन सुडागमेः भर्तृदारयोरिति बहुवचनोत्तत्सोमरपदे वेबहुवचनमेव पूर्वपदे तद्द्विवचनमित्यन्ये एकदेशविकृतन्यायेने
ति आनुमातिकस्यान्यादेशाभावेनत्पर्थः सरूपाणामेकशेषएकविभक्तौ तत्रस्योदाहरणमाह यथाभ्यामिति भ्यामपीत्यर्थः अ
न्येतु मातृपदिकानामेकशेषमाह मातृमात्रोः प्रतिषेधो वक्तव्यः माता च जनयित्री माता च धान्यस्य मातृ मातार इति वैरूप्यविषयोदाहर
णोपन्यासेन यस्यापि विभक्तौ तानामेकशेषस्तेनापि मातृमात्रोः प्रतिषेधो वक्तव्यस्तस्यापि सरूपाणि मातृभ्यो मातृभ्यां वेति प्रथम

सा च तैव तैरित्येकशेषसंभवात् २

तमेतत्तु विभक्त्यंतानां सारूप्ये भवितव्यमेवैकशेषेणेत्यग्रिमभाष्येणैव भ्याम्येकशेषो भवत्येव अर्थविप्रतिषेधादेकशेषेणेति कैयटोक्तं तन्न
वि. युक्तं तैरित्यत्र प्रयोगस्याप्यवगतिसंभवात् अर्थविप्रतिषेधे नैकशेष इति वचनाभावाच्च अत एव प्रातिपदिकानामेकशेष इति पक्षे पृथक्
५६ विभक्तौ यानि सरूपाणि तेषामेकशेष इत्येवकारादिति वाक्यार्थनिष्कर्षो भाष्यकृता दर्शितः अपकर्षस्य भाष्यकृता त्वाश्रयणानाश्रय
56 णाच्च अत एव प्रातिपदिकतंत्रमाश्रित्यैकशेषप्रत्याख्यानेन न फलभेदः तत्र हि मातृभ्यामित्यत्र सारूप्यं तत्रैव संभवति मातरावित्यादौ च
नेत्याहुः तद्धितांतानां द्वैरूप्यादिति तात्पर्यं यानि रूपाणि पंचैव तत्रैको हरिणीशार्ङ्ग्योरेकशेषो न स्यात् एवकारानपकर्षे तु जननीवाविपरिके
त्वाविनोरेकशेषापत्तिरित्युभयतः पाशारज्जुरिति तत्परिहाराय विभक्तावित्यावश्यकमिति भावः अन्ये तु एवकारो नापकृष्यते भाष्येऽदर्श-
नात् मातृशार्ङ्ग्योस्तु कथं भ्याम्येकशेषो भवत्येवेत्युक्ते एवं गुड्डस्यैतत्कुमारीशार्ङ्ग्योरजयोरेकशेषो भवत्येव शसि तु न यणः सर्वसवर्णे भ्यो
रूपभेदात् मातृमात्रोः प्रतिषेधो वक्तव्य इति वार्तिकं तूपलक्षणं एकविभक्तावित्यत्र सहविवक्षाया उपलक्षणार्थं सहविवक्षायामे
कविभक्तेरेव दर्शनात् तदेतदभिप्रेत्य भगवता भाष्यकृतोक्तं एकविभक्तावितिकिमर्थं पयः पयो जरयति वासो वासश्छादयति ब्राह्म
णाभ्यां कृतं ब्राह्मणाभ्यां देहीति अत्र सहविवक्षाविषयप्रत्युदाहरणदानेनैकविभक्तावित्यस्य सहविवक्षोपलक्षणत्वं स्पष्टमेव सूचितं विभ
क्तिः सारूप्येणैव पठनं इति प्रातिपदिकैकशेषोपपादनप्रकरणस्थं भाष्यं त्वेकदेश्युक्तिः नैवं वे सति मातृमातरावित्यत्राप्येकशेषाप ५६

त्रिः शिष्यमाणस्य कृतदीर्घत्वेनैव तेन जननीबोधासंभवेनाकृतदीर्घत्वे तेन परिच्छेत्तृबोधासंभवेनैकशेषाप्रवृत्तेः एकशेषशास्त्रे हि
एकस्यानेकार्थकतोत्पादकं किं तु लोकसिद्धानुवादकं न हि लोके दीर्घोपधान्मातृशब्दाज्जननीबोधो ह्रस्वोपधाच्च परिच्छेत्तृबोधो
दृष्टः तदेतदभिप्रेत्य भगवता भाष्यकृतोक्तं शब्दस्य स्वाभाविकी वाऽनेकार्थता स्यात् वाचनिकी वा तद्यदि तावत्स्वाभाविकी अशिष्य
एकशेषः किं कारणमेकेनोक्तत्वात् तस्यार्थस्य द्वितीयस्य प्रयोगेण न भवितव्यं यदि तर्हि एकेनानेकस्याभिधाने भवति स्वद्वन्द्वग्रायो
एकेनोक्तत्वादपरस्य प्रयोगोऽनुपपन्नः इदानीमेवोक्तमेकेनानेकस्याभिधाने भवतीति सरूपाणामेकेनानेकस्याभिधाने भवति न
विरूपाणां किं कारणं सरूपाणामेकेनानेकस्याभिधाने भवति न विरूपाणामभिधाने पुनः स्वाभाविकमिति एतद्भाष्येण हि शि
ष्यमाणस्य स्वविरूपार्थबोधकत्वस्य रूपमेवोक्तं अत एव ङीबेतङ्ङीषेतहरिणीशब्दयोः स्त्रीत्वविवक्षानिमित्तकपुंवद्भावापेक्षया
नैमित्तिकत्वेनान्तरङ्गत्वादेकशेषे कृते स्वरभिन्नानामिति ङीबेतस्य शेषे तस्मात्स्वरस्य ह्रस्वत्वार्थः णीहावित्तिमितिरूपेण भवति तश
ब्दे चरितस्य विरूपत्वेन हरिणीशब्दार्थप्रतिपादकत्वात् यत्र तु तद्धिते द्वयोः रूपे समाने तत्र भवत्येवैकशेषः यथा हरिण्योरपत्ये हा
रिणेयाविति अत्र भस्याढे तद्धिते पुंवद्भावेन अढे इति पर्युदासादित्याहुः नेत्रस्योदाहरणमाह यथाऽऽदाभज्जेतामित्यादि य
था शब्दोऽत्रोदाहरणं यौ न दृष्टान्तार्थः अत शब्दः शक्त्यादस्य विभीतका तस्य देवतादास्य वाचक एकशेषेणतनात्र निर्वाहः प

वि॰
५७
57

कथानन्वयेन सहविवक्षाया अभावात् तथा च तदर्थमावश्यकेनानेन सौत्रेणैव निर्वाहे एकशेषारंभो व्यर्थ इति भावः एकशेषानिर्वाह्यं
स्थलांतरमाह राम एवमसौ भज्यतामिति अत्रैकवचनांततेनैकशेषः शंकितुमशक्य इति भावः शब्दतेनार्थतेनेति अर्थस्य विजा-
तीयत्वे शब्दस्यैकजातीयत्वे शब्दतेनेत्र अर्थस्यैकजातीयत्वे ऽर्थतेनेत्र पर्यायपरिहारासहत्वेइति पर्यायेण प्रवृत्तिः परिहृतिस्तदसहत्वे इ-
त्यर्थः एकार्थकानां शब्दानां पर्यायेणैवार्थबोधनाय प्रवृत्तिर्न युगपद्भिन्नार्थकानामेकानुपूर्वीकाणामक्षादिशब्दानां युगपदे-
वार्थबोधनाय प्रवृत्तिरर्थभेदात् तथा च विभीतकादिबोधकाक्षशब्दस्य देवनादिबोधकाक्षशब्देन सह पर्यायपरिहारासहत्वे युगप-
त्प्रयोगार्हत्वे भिन्नार्थतेन शब्दतेन चेत्यर्थः तत्सत्वे पर्यायपरिहृतिसहत्वे एकार्थत्वे इति यावत् ननु तेनास्य लेखानुराहत्येव बोधः एक-
शेषस्थले तेनैवेत्यत्र कथं तेनैवैकेन निर्वाह इत्याशंक्याह अन्वयिपदार्थभेदादिति ग्राहस्यैवेति शब्दाहृत्यापदार्थोपस्थित्याहृत्या
चेत्यर्थः दर्शनेनेति घटोयं घटोयमित्यादौ अन्यत्रासहविवक्षायां सारवोर्मिजइति सरस्वोभवः सारवः दांडिनायनेति निपा-
तनात्साधुः अरवेण सहितः सारवः सारवस्यासौ सारवश्चेति कर्मधारयः तथा चोक्तभाष्येण सारवेत्यादि महाकविप्रयोगेणैव
सहविवक्षायामेवोक्तनियम इति सिद्धं केचित्तु तिष्यपुनर्वस्वोरिति सूत्राद्द्वंद्व इत्यनुवर्त्य द्वंद्व एव सरूपाणामेकशेष इत्याहुः ननु स-
रूपाणामेकशेष एवेति नियमवत्सरूपाणां सहविवक्षायामेवैकशेषो नासहविवक्षायामित्यपि नियमोंगीकार्यः तेन तत् ५७

तीयान्तवचनेनयोर्ब्राह्मणाभ्यामित्यनयोर्ब्राह्मणाभ्यांकृतेब्राह्मणाभ्यांदेहीतिपृथक्प्रयोगः नैकस्यनिवृत्तिः अन्यथाब्राह्मणाभ्यां
कृतेदेहीतिप्रयोगापत्तिरित्याशंक्याद्वितीयनियमेस्वीकृतोक्तप्रयोगापादनेनेष्टापत्तिमाह असहविवक्षाविषयेणेति पचइति प
केप्रथमान्तमेकेद्वितीयान्ते नीलोत्पलसर्पिषीनीति एकेद्विवचनान्तेनपुंसकेनैवेऽन्यस्यविशेषणं एकेऽन्यान्तेनतेनोविशेषणं अन्यपदा
र्थावगतयइति ननुवाद्धिडोनम् व्याहृतयेकमेवारयस्यावश्यकत्वेयकमिदित्यदंर्थगर्भमितिचेन्नात्ते नन्वर्थेअर्थेप्रतितदपिप्र
त्यर्थमितिघटकटाविति द्वंद्वः कस्मान्नभवतीत्याशंक्याह अनेकघटादिपदानामिति तेचपरइति एकशेषेद्विवचनापत्तेः स
हविवक्षाभावेनतदसंभवाच्चेतिभावः इत्यर्थेबोधयितुमिति एकग्रहणसामर्थ्यादप्यर्थांतर्भावेणसमासः सरूपाणीत्य
स्याविरूपाणीत्यर्थः एवंचैवकारापकर्षोमास्त्वतदपकर्षेतत्कार्यसंपादकैकग्रहणंमास्त्विति भावः दूषणंभाष्योक्तमि
ति समाहारद्वंद्वविषयेएकशेषेतत्पतद्दूषणासंगतिरितिभावः अत्रवदंति सोयमाक्षिकः सावेयमाक्षिकीतच्चेदमाक्षिकेतदिदं
सर्वमाक्षिके तानीमान्याक्षिकानीतिअबहुप्रकृतीनोयत्रहृतिस्तत्रफलमेनेनेतिवार्तिकेनसमाहारेद्वंद्वस्यनिषिद्धत्वात् अप्र
संगात्द्वंद्वेप्रसक्तेविधीयमानएकशेषस्तद्बाधनक्षमः इतरेतरयोगद्वंद्वेत्वप्रसक्तेएकशेषोविधीयइति बहुवचनप्रसंगेएकशे
षोविधीयतेचद्विवचनेशास्त्रेएकवचनार्थमेकवचान्यतरस्यामितिस्यात् किंवानेनेतरेतरद्वंद्वयोगेएकशेषाभावोज्ञाप्यतेनाव.

वि॰ तापि तस्य समार्थैकत्वसंभवात् तस्माद्घटश्च घटश्चानयोः समाहारे घट इत्येकशेषो भवत्येव न च नपुंसकत्वप्रसंगः समाहारद्वंद्वस्य वचनादि
५८ धानात् एवं च घटघटघट इत्यादेरनभिधानेनाप्रयोगीयमित्यपरमनुकूलमिति अत्र ब्रूमः समाहारद्वंद्वविषयेप्येकशेषप्रवृत्तौ विभक्ती
तानामेकशेष इति पदे ऽयं तर्हि दोषः कश्चिद्वचनलोपः द्विवचनबहुवचनविधिर्द्वंद्वप्रतिषेधश्चेति भाष्यं कश्चिदिति शिष्यमाणस्यैकवच
नस्य लोपो वक्तव्य इति केपट्यग्रे प्रश्न्याकुर्य्येत एकवचनान्तस्यापि साधुत्वे तदसंगतिः तेनैकवचनान्तस्यासाधुत्वलाभात् एतद्भाष्यशा
माणादेव समाहारद्वंद्वविषयेनैकशेषः अत एवैकशेषोदाहरणानि द्विवचनबहुवचनान्तान्येव भगवता भाष्यकृता प्रदर्शितानि न
त्वेकवचनान्तानि तत्र शेषेष्विव भाष्ये कथं पुंलौकिकाः शब्दान्प्रयुंजते लोके वैकस्मिन्वृक्ष इति प्रयुंजते द्वयोर्वृक्षाविति बहुषु
वृक्षा इति तेन गार्ग्यो वृक्षः पिता इत्यादिभ्य एकवचनान्तेभ्यः क्रमेण गार्ग्यायणवृक्षसामान्यबोधो न गोदागार्ग्यौ मीनचोषाविति वन
नितृगतभेदानामिति भेदेनाप्रतीयमानानामित्यर्थः तथा च तिङन्तेभ्यो ऽभेदेनैव शाब्दशक्तिस्वभावेन प्रतीत्यानानेकशाब्द
प्रयोगप्रसंग इति भावः ननु मातृमात्रोः प्रतिषेधो वक्तव्य इति वार्तिकप्रयोगः कथं एकशेषस्य इष्टत्वादिति चेन्न एकशेषे सति
विवक्षितार्थानवगमात्तदभावः एवं स्वस्राद्यर्थो विदितौ जननावाचिनः परिच्छेत्तृवाचिनश्चैकशेषप्रतिषेधो वक्तव्य इति ए
षा वा पौमातौ इतिसिद्धेननान्यतरस्यमिति केचिन्न समाधानात् एतेनान्नोमध्ये वामनोगामहामाविति प्रयोगोपपत्तिः [illegible] घव ५८

वर्णैवयोयमेविषमत्वलमत्वलेतिनिर्देशोपिशमकः स्वरभिन्नानामिति भिन्नस्वराणामित्यर्थः ननुस्वरभेदेकथंसारूप्यमितिचेन्न
रूपग्रहणेनवर्णानुपूर्वीग्रहणात् तथाचतत्रतत्रकोष्टुरितिसूत्रेभाष्ये नहिस्वरोरूपवानिति नविभक्तौतुस्माः ननुप्राग्
दिशीयविभक्तौनायंनिषेधः प्रवर्ततेइत्येवोदितेनव्याप्यतामतआह अतएवेति उक्तव्याप्यांशेविहायसामान्यतोऽनित्यत्वज्ञापना
देवेत्यर्थः अन्यत्रेति नचैतत्त्वकारेतत्फले अनुस्वारेणाप्युपपत्तेः एकवचने नन्वेकवचनग्रहणेनप्रत्ययग्रहणपरिभाषो
पतिष्ठते एकवचनशब्दस्यप्रत्ययमात्रबोधकत्वाभावात् तमावेकवचनइत्यादावर्थबोधकतस्याप्यंगीकारात् स्तुःसंबुद्धिरित
क्तौतत्पतिष्ठेत नचसंज्ञाविधाविति निषेधः यथासामेवितशब्दयोगार्थोपपत्तयेऽक्तनिषेधाप्रवृत्यातदंतविधिस्तथाज्ञापितदं
तविधिशंकायाअनिवारणात् ॥ आमंत्रणसाधनतस्यैवसंबोधनसाधनतत्साधितदंतयवसंभवादित्याशंक्याह संबुद्ध
विति इतरेषामिति संबुद्धाद्विमस्येत्यर्थइतिभावः फलाभावादिति आक्षेपकोपपत्तिरूपाक्षेपफलाभावादित्यर्थः संबुद्ध्युपप
त्तिरिति प्रयोगाइतिशेषः तथाचप्रयोगेतदुपपत्तयेप्रयोगएववाक्षेपः साक्षात्सूत्रेइतिभावः आद्विमस्याक्षेपकानुपपाद
कत्वेनाक्षेपासंभवमुक्त्वाऽऽक्षेपमूलसूत्रानुपपत्तेरभावेनापितदसंभवमाह किंचेति उक्तस्यार्थस्यप्रत्यासत्त्याविहितस्तदादे
रित्यर्थः स्यादतआहेति अन्यतेनाक्षेपाभावेप्येङ्ह्रस्वात्परायसंबुद्धिस्तस्याहल्लोलोपइत्यर्थेनहेकतरदित्यादौसंबुद्धिलोपवार

वि॰
५६

59

एतत् अंगादेशे पाठ्य इत्याशंक्याह कृतेतीत्यादि ः ननु पौर्वापर्यभावोऽप्यनादिवद्भावेनैव साध्यतामत आह नाहस्थानातिदेशादिति पौ
र्वापर्यानातिदेशादित्यर्थः इत्संतत्वाननिदेशादिति तन्नार्थः तस्यस्वतः सिद्धत्वेनातिदेशानपेक्षणात् अन्यादित्यस्य अन्योपस्था
पितस्य वस्तुतस्त्वपर्येनोपस्थाप्यतेतस्यतेनैवान्वय इति नियमे मानाभावः गुणाश्रुतोपस्थापितस्यैकत्वसंगेनानन्वयाद्यभिवारः
श्च यदि वत्संगत्याद्गुणेनान्वयस्तर्हि प्रकृतेपि हलन्ताद्वारा संबुद्ध्यान्वय इति तल्ले पतदर्थमेवेति अंगादित्यस्य हल्न्वयस्त्वनार्थमि
त्यर्थः नन्वेवमपि कृतवदित्यत्र लोपाद्वर्गः अदंतस्य यस्माद्विहितस्तदादितानात् नकारस्य च संबुध्यवयवत्वादिति चेन्न प्रत्यय
वदकभागावदितस्यैव तदादेर्ग्रहणेनादोषात् नचैवं कृतेत्यत्र लोपानापत्तिः मकारस्य संबुद्ध्यवयवत्वोपपादनायामित्यस्य परादिवद्भा
वेन संबुद्धित्वस्य वक्तव्यतयाकृतेत्यस्य प्रत्ययवद्वर्णकभागवदितत्वादितिवाच्यं संबुद्ध्यवयवत्वस्योपलक्षणेन परादिवद्भावानाश्रय
णेनादोषात् मकारस्य संबुद्ध्यवयवत्वे पूर्वमासीदित्वेत्याशयात् नन्वेङ्ह्रस्वात्संबुद्धेर्लोपइत्यर्थपिकृतेत्यत्र लोपो भवत्येव
एकदेशविकृतन्यायेनमस्य संबुद्धित्वात् तथा चोक्तव्याख्यानक्लेशो व्यर्थएवेत्याशंक्याह मस्येति संबुद्धित्वाभावादिति इतो ह्रस्वा
न्तागात्परसंबुद्धेरभावादिति व्यवहितसाध्येनान्वयः स्थानिभूताल्यर्थेनेनेति अल्स्थानिभूतोयः सुरितिसमुदायस्तद्धर्मत्वाभा
वेनेत्यर्थः तथा च स्थानिवदादेशइत्यत्र स्थानिपदस्यादेशविधायकशास्त्रघटकस्थानषष्ठ्यंतपदत्वेंजेशाघमिकोपस्थितिरियपर॰ ५६

तेपि संबुद्धित्वस्य तद्धर्मत्वाभावादतिप्रसङ्गो न स्यादिति शंकाभिप्रायः तस्यानल्विधित्वादिति तस्य संबुद्धित्वस्यानल्धर्मत्वादित्यर्थः
यथाश्रुतौ पूर्वोत्तरपदत्वावस्थागतत्वादेव संबुद्धित्वस्यानिभूतत्वाल्धर्मत्वशंकायाः समुदायस्यामन्त्रितत्वापादनेनैव निवारणे
एतया संबुद्धिसंज्ञायाः समुदायोद्देश्यकत्वोपपादनस्यासंगतत्वात् इदमयुक्तं पूर्वोत्तरपदाभ्यां संबुद्ध्यवयवत्वस्य विशेषणत्वापत्तावव
गमात् तत्र चोक्तरीत्या दोषात् प्रसङ्गाधिकारस्यादिति एतेनागसंज्ञाकृतं बहिरंगत्वमुक्तं नतु गुणे बहिरंगत्वस्य पूर्वपदाभि
प्रेतत्वे परत्वान्नित्यत्वाच्चेति समाधानग्रन्थासंगतिरिति वाच्यं संज्ञाकृतबहिरंगत्वस्यामिति न्यासे परत्वान्नुडित्यादिभाष्येण समानाश्रयत्व
परनिमित्तापेक्षत्वेन बहिरंगत्वस्य वानाश्रयणमिति समाधानग्रन्थाशयात् सामर्थ्यादेव ङग्रहणसामर्थ्यादेव ङः ह्रस्वग्रह
णसामर्थ्याच्चेति ह्रस्वग्रहणे हल्ङ्यादीत्याद्यर्थे सन्निपातपरिभाषया ह्रस्वस्य संबुद्धिलोपानिमित्तत्वे तद्वैयर्थ्यं अभ्युच्चय इति नित्या
नित्ययोर्विप्रतिषेधायोगादिति भावः अनवकाशत्वं संग्रहइति ननु तथा सति गुणे कृते लोपाप्रसंग इति चेन्न ङनत्वनिमित्तक
लोपप्रवृत्तेः फलभेदात् विषयभेदे उत्सर्गापवादभावो नेति त्रिपथगायां निरूपितेन विरुद्धमेवम् ङयोरन्यत्र लोपाप्राप्तिविषये
गुणस्य चारितार्थ्याद्गुणस्य न लोपापवादत्वमित्याशंक्याह नत्वेमकइति बाधकाबाधितप्राप्तेरभावेपि प्राप्तिमात्रमस्त्येवेति भावः
हि मात्रवारणायेति नत्वेवं पूर्वसवर्णदीर्घेण सिद्धेरेतद्वैयर्थ्यमिति वाच्यं गौरीइत्यादौ त्रिमात्रप्रवृत्त्यर्थत्वात् वाक्ये दर्शितत्वेनैकवा

वि॰
६०
60

कार्येणाबन्तस्मात्त्वम्तः नन्वतस्मादितिमास्तु अकइत्यनुवर्त्याकः परस्य न नविधानेन लिड्डस्यादावदोषात् नवादेः परस्येत्यादेर्नका
देहरीनित्यत्वदीर्घश्रवणनापत्तिः श्रासः सोनः ऋसीतिन्यासेनादोषात् अकः परस्य शश्वः सस्य नइत्यर्थः पूर्वसवर्णदीर्घस्यतकौडि
नन्यायेनबाधः स्यादितितन्नशेको पूर्वसवर्णदीर्घैः कः परशमोऽसंभवेनोक्तन्यायाप्रवृत्ताबनवकाशतेननैबाधितानवे प्रवृत्ते
पश्चानत्प्रवृत्तेः नन्वतितऽनित्यशोत्वशैकत्तेननवारितापर्याडकन्यायेनतस्यबाधेपुनरप्रवृत्तिरितिचेत्सत्यं अकइत्यस्य सकारविशे
शेषणतेनादोषात् अकत्वसामर्थ्यान्तत्ययानवयवस्यापावपूर्वसवर्णदीर्घोत्तरमेवननप्रवृत्तिरितिनकाप्यदोषइत्यभिप्रायेणशे
कते तस्मादिति किमिति ष्टद्वश्वाह तऽमितयवननादिति वस्तुतस्तुकृत्स्नमर्थे ग्राग्रीदित्यादौणत्ववारणायतनैवंव्यवा
येनेतिलद्रुन्यासेनसिद्धे ऽ इकुग्रहणमेतेरेवयवायइत्यर्थकं भविष्यतीति सूपपत्रे भाष्यम् आदरसमाम्नायिकेरिति वर्णो
रित्यर्थः अजभागेतनवर्णत्वे यस्मात्प्रत्ययविधिः गुणनोचेतिन्यायेनतास्मिन्नितिपरिभाषायाअप्रवृत्तिमाशंक्याह गुणह्न
तात्मेति गुणः कृतात्मसंस्कारः प्रधानेप्रतिपद्यते प्रधानस्योपकारेहितथाभूतस्यविवर्तमानइतिन्यायः वस्तुतोगुणनोचेतिन्यायोनात्रश
क्षेसमाश्रीयते रत्नकेशाक अपद्यमापतिरितिश्रादिपदग्राह्यविसेपन्नपाठकेनोक्तमादिपदाद्यस्येतिलोयोग्रास्यइतितन्नक्ले तास्मिन्कर्मेयेर
कारस्यस्थानिवत्वादभीयादित्यसिद्धताद्यानपदांतेतिनिषेधः लोपस्यपदानवयवत्वात् विणोतड्न्यायेनसमानाश्रयत्वाच्च ॥ ६०

वामशासो नियमेन तत्राह चर्यौत्तु स्वपथवा वृत्तप्रत्ययस्य ग्रहणेन ह्रीश्यो ऽस्तु सदा हनेवं अथ शास्त्रादौ प्रत्यये रूपे परादि वद्भावेन व प्रत्ययते एवं वा
रिश्रौ इत्यत्रैकोऽवीति न मस्त्रीशावस्य यच्छ्रेह्येन समासेऽ विश्वितीयङ् न वस्यानि वद्भावः नपदान्ते निनिषेधात् ननु विपिग्रहणेन कृ
तेपि स्त्रीसमस्तनिहृपितो गतमादायेयङ् उवीरमतप्राह प्रत्ययासत्तेति तदादिग्रहणस्य भवामीत्यादिम्लोके प्रयोजने नमुक्ते
विधान सामर्थ्यान्न तत्रांगस्येत्यस्यासंबंधकल्पनया दीर्घसिद्धेः हन्तेयङ्लुकभिधाने हन्मानाभावादित्यभिप्रेत्य स्वयं तस्य
फलमाह तदादीति वस्तुतस्त्विकीर्षोमित्यादौ वारितार्थोऽन्त्यलोकमपि प्रयुक्ते ननु [illegible] नसंप्रसारणं इत्यत्र संप्रसारणपदेन लक्षण
याख्याति परमतेन दोषइ स्मरुवेदाह किंचेति ननु नत्वमतानास्मि त्रिनित्यासे ल्लमताल्लसे प्रत्यये परतीयद्वं सकार्यं तदेव निषि
ध्यत इति नात्र दोष इति वेद्यां प्रान्तरे गृह्याण प्रियावित्यादौ तावदियङ् नापत्तिर्दोषः समहायेव्यपदेशिवद्भावाऽ ग्रहत्याप्रीत्यस्या
नेगत्वात् एवं जुहोतीत्यादौ गुणो न स्यात् गुणस्तु करोतीत्यादौ चरितार्थः प्रत्ययइत्युक्तौ तु तत्परकस्य मस्वतदादित्व व्यपदे
शाभावोऽ सत्वेनासहायत्वाद्व्यपदेशिवद्भावः सत्वमः अथ त्वत्रकथं विद्वद्व्यपदेशिवद्भावे मन्यसे तदा श्रयं मित्यादावियङापत्ति
तिः नत्वमतेनेति निषेधस्याकृविधयाऽ ग्रहणेः प्रवीरनाकाविति तत्र हि संग्रासेन्नायां नत्वमतेनेति निषेधो न प्रवर्तते तस्माद्ग्रग
तविशिष्टानुदेशैकत्वादित्युक्ते ननु प्रत्यासत्याभिसनिमित्तकांगस्यैव ग्रहणान्नोक्तदोष इत्याशंक्य समाधत्ते भिन्नइति वस्तुस्थि

कवचनस्यैवेति नसमसमेकवचनस्य संज्ञाभावःसंबंधः यशाँदित्यस्यापेदेति इदंचव्यपदेशवद्भिरंगमितिप्राचीनमतेन किंचातिदेशिकेनेत्या॰
वि॰ ति इदंप्राथमिकस्यपरिहारस्योपलक्षणेनसमाधानांतरं इत्युक्तमस्तीति इदंपरिभाषेंदुशेखरेणविरुद्धं ननुझलितिकिमितिशंका॰
८१ निर्देशाज्जस्यादावतिव्याप्तेः स्फुटत्वादित्याशंक्याह उक्तइति उक्तइत्यत्र झलीत्युक्तौतु मिपिहल्ग्रहणानापत्तेः मध्यलोरित्युक्तौततोदीर्घइत्या॰
61 दावपितदनुहलीभवामेरामाभ्यामित्यादावेवदीर्घः स्यात्रपवावइत्यादौ अप्रवृत्तिज्ञापनार्थमिति अप्रेतस्वयामेत्रितइत्यतोऽनु
वर्तमानस्यपदस्वस्य यजीत्येनत्संबद्धत्वेननतत्संबद्धस्यनिहत्येत्यस्यप्रतिनेत्यत्रअस्यपदस्वस्य यजीत्येनतत्संबंधयस्यहलीत्यस्यनिहत
येझलग्रहणेस्यादित्यज्ञापकमेतेसंनिपातपरिभाषाग्रहणभावस्य तत्संबद्धस्यानुहलीत्यरामेषिस्यादौ षत्वेनस्यात् सुपोत्यस्य
तयत्रसंबद्धत्वेपिझलग्रहणसामर्थ्यात्केवलस्यानुवृत्तिः किंचसुपोस्यरितियादेशेयत्नाभावार्थेझलग्रहणेप्रवेससंनिपातपरि
भाषायाअप्रवृत्तौहलिसर्वेषामितिनिर्देशोगमकइत्याहुः नमापमेरितिवार्णादांगमितिपरिभाषयागुणेबाधितेतिशेषः स
न्निपातपरिभाषयानुसंधारणेनत्वेवगुणोपिनस्यादितिभावः इदित्वप्रभृत्यादौहलिलोपानापत्तिर्बोध्या बाधितेतिशेषइति
यत्रपाठकेनोक्तं एवंसतिषडित्यादौआंतरतम्यात्षकारएवस्यान्नटकारः अल्पप्राणतयाप्रयत्नभेदात् तस्मात्षत्वस्यासिद्धत्वा
जश्त्वेततश्चर्त्वमित्येवयुक्तमितितन्न उत्सर्गापवादभावपरित्यागेकारणाभावात् षडित्यादौतुनदोषः शासिदयोः प्रतिषेधेनच॰ ८१

विधौ झलुपदेन नवर्मिन्नसन्नशा विधौ जश्त्वमित्रस्य ग्रहणबोधनेन जश्त्वोत्तरमेव वर्तेश्वहृतेः समानाश्रये चरितार्थस्य सवर्णदीर्घस्याश्र
येगुणेन तद्वैरूप्यसंपादकादेशग्रहनियोगेण चरितार्थ सवर्णसमानरूप्यसंपादकादेशग्रहनियोगपक्षे लेवर्तस्यासिद्धत्वेन न तस्य जश्त्वेवाय
नाश्च ग्रहणेरपि विशेषोऽध्यवसायकपरस्ति न्यायात् अनेन तस्योताषडिति निर्देशेन जश्त्ववर्तयोरुत्सर्गापवादभावप्रवनेत्यन्यथा ज-
श्त्वाधिनावर्तेषकारस्यानन्तरभावपक्षे जश्त्वे नडकारस्य श्रवणापत्तौ टांतनिर्देशानुपपत्तिः नवधुनर्भावोपक्रमात्रैतन्सिद्धिरिति वा
च्यम् जश्त्वे धुनस्वरताभावस्योपक्रमे धुनर्भावपक्षे चर्त्वाभावाश्रयणयोगात् तथा वेशिशियन्तरित्यादौ द्वितेह्कने संप्रसारणेऽशि
श्रुवन्तारितिस्यादित्याहुः पर्यस्यादिति नन्वतादेशव यो द्वितीया इति घकारश्रवणेतन्तस्यासिद्धत्वात्तस्नेति फलभेदात्र व्यर्थमिति वेत्र
तथ्यासतिव यो द्वितीया इत्यस्यानेन तरेशस्त्राद्धे यान्तकइतिकार्यम् शारीस्य न्वहत्याशारादावाईयान्तके सस्य द्वितीयइत्यर्थः सर्वो
न रतम्यान्यपव नासस्यो वित्यत्रसीतिकर्मेच्छे नवलाघवाभावः नकारेकृत्वा घकारकारणापेक्षयासात्यत्यकारणाऽपेक्षप्र-
क्रियालाघवात् घकाराभावेववरिचेति वर्तेननकारः एवं सिद्धेनतत्विधानमित्याशयात् प्रावोमतेतस्य बहिरंगत्वेनासिद्ध
नातु द्वितीयाग्रहणमेव षडित्यत्रेति अनेनतरत्वान्द्वन्याय इत्यत्र तदनुहृतिहृविता नन्वकशायक्रमणाइति निर्दीर्घमात्रे सविंयात
परिभाषानप्रवर्तते अतएवानेनागाति सूत्रे भाष्येनाडिति न्यासमान्यपादितः नामीति सूत्रेभाष्ये वानोनामित्युदाहृते नन्वहृदाणामि

ति परत्वान्नुडपि वेत्तस्यन्याय्यत्वात् अत्र लोप इति सूत्रस्थं शकाराभावे यत्ना नामिन्यादौ नामीति दीर्घत्वं बाधित्वा परत्वात्र लोपः स्यादिति
वि· षेन्नुडपि वेति दीर्घविधेदत्यानलोपस्यानित्यताभिप्रायमिति न तद्विरोधः एवं चर्मणामित्युदाहरणे नामीत्यस्योपन्यासेन गुरुश
६२ त्वाशंकासमाधानोत्तरमाह कृत्वेति नामीति सूत्रे भाष्ये ऽग्नीनामित्युदाहरणोपन्यासस्तत्र यथासिद्धत्वाभिप्रायः न तद्धलाणामिति
62 स्यानुदाहरणताभिप्राय इति भावः अथवादिवायमाशंकेति इदं तु भाष्यमापादयो वा गुरुत्वपविविक्षिपणिपनिम्नश्रायः सार्वधातुक
इति न्यासाभिप्राये श्रुतत्वनिपदेशापकमिति अनश्व इत्यादौ तु न दोषः पदद्वयाप्रयत्नेन बहिरंगत्वानामयानुडो ऽसिद्धत्वात् परेति दम
णादीनामश्रुतत्वनियत्वपवेतिससिद्धांतविरुद्धे यत्तु कश्चिदाह नुदीतिन्यासे सन्निपातपरिभाषयानुड् दीर्घनिमित्तेन स्यात्नामीतिन्यासे
तु नुडो न दीर्घनिमित्तत्वमिति न सन्निपातपरिभाषाविरोध इति तन्न नामीतिन्यासे पि नुडो चटकनयादीर्घनिमित्तत्वात् नुदीतिन्यासे पिक
स्यायेति निर्देशेन दीर्घविधौ सन्निपातपरिभाषाप्रवृत्त्यभावकल्पनासंभवाच्च इणश्चेकवचेति इतरेतरद्वंद्वे द्विवचनमिति भ्रमनिरासा
याह वर्णग्रहणामिति इकारेति वर्गोद्दितिरयोन प्रथमः तस्मात्स्थानेन यापप्रयत्नभेदात् द्वितीयमिति ऊष्मणामीषद्विहृतत्वेन सेत्य
वसूवत्वे सर्वादीनि सर्वनामानि तद्गुणसंविज्ञान इति तस्यान्यपदार्थस्यापि गुणविशेषणानि तेषां कार्यान्वयितया संविज्ञानेय
त्रेति विग्रहः संयोगेन समवायेन वा यत्र वर्तिपदार्थसंबंधी सन्यपदार्थस्तत्रग्राये णातद्गुणसंविज्ञानः यथा पीतांबरमानय ले ६२

बकर्णमानयेत्यादौ अत्र तद्गुणसंविज्ञानः यथा चित्रगुमानयेत्यादौ क्वचित्संयोगादिनावर्त्तिपदार्थसंबन्धिनोऽन्यपदार्थत्वेऽपि अत
द्गुणसंविज्ञानः नागयज्ञोपवीतीभोज्यतां लंबकर्णो भोज्यतामित्यादौ उद्भूतावयवभेद इति उद्भूतश्चारोपितोऽवयवस्तत्सहचरिता
संख्यायेति बहुव्रीहिरुदाह आरोपितेति न हि तदेतद्विषयं विनेति इदमत्रोक्तं अश्वईश्वरतरश्चेति सर्वनामसंज्ञानिषेधार्थमावा
श्यकत्वात् तस्मादन्वर्थसंज्ञादिभिः संज्ञा सर्वादिभिर्विशेष्यते अपूर्वी वा तदं तद्विधिह प्रसंख्यायत इति कैयटोक्तमिति केचित् भाष्ये
स्थितमिति अथवांगाधिकारे पठ्यते श्रूयमाणेन विभक्तेस्तद्वतीत्येतत् सूत्रस्थभाष्यस्थितमित्यर्थः सर्वनाम्नोऽवयव
टेरिति नतु सर्वेतरस्य टेः तथा सति सर्वकाभ्यामित्यादौ दोषापत्तिः आकारस्य कारेतिवार्तिके तु युष्मदस्मच्छब्दविषयके अव्ययस
र्वनाम्नामित्यस्य अनुवृत्तत्वात् तेन टेरित्यनेन संबंधः प्रातिपदिकादिति वाक्यस्य सर्वनामात्मकप्रातिपदिकप्रकृतिकसर्वेतरपरे परमा
त्तान्वयोऽभवेऽकृत्वा घन्वयविवक्षायामिदं कृत्वाद्यन्वयोत्तरं परमतान्वयेऽनेनेदमितिभावः इदमत्रोक्तं सर्वनामप्रकृतिकसर्वेतरा
दित्यस्यानन्वयात् परमभवकानित्यत्र भवच्छब्दस्य शत्रन्तत्वलक्षणेन सर्वनामप्रकृतिकसर्वेतरत्वेनाकच्सिद्धेः उत्तरपदे चेति नि
षेधस्तु पदान्तविधावेव भवन्मते संज्ञत्यनेन तदेव प्रातिपदिकमेव प्रकृतितयाश्रित्याकच्प्रहनेऽस्य परमतत्कृत्स्य योगगापदान्व
येषु गापदेव समासतद्धितहृतिसंभवात्र परमसर्वेत्रेतिकथं विडदाहरणे शाकाभ्युपपादयितं परिनिष्ठितविभक्त्यास

वि·
६३
63

मात्रेपि समुदायादुत्पन्नसमभ्याः सर्वनामाप्रकृतिकत्वात्तदंतात्त्वलोऽसंभवात् अटस्य सर्वनामप्रकृतिकसमभ्येतत्तेपि तस्मात्त्रलि
परमादेस्तड्डितोतत्वाभावेन प्रातिपदिकत्वानापत्तिः शिवभागवतादावितत्तडुपपादनेपि तड्डितोतत्वाभावेन समुदायस्यावयवत्वाना·
पत्तिः तदनापत्तौ समुदायाद्विहितस्यापोऽलुगनापत्तिः सर्वनाम्नः परायाः सप्तमी तदंतात्त्रलित्यर्थेन तच्छब्दात्रश्रेस्य कात्कपरे पदश
ब्दः प्रकृतिकसमभ्येतेये इति ततस्त्वलापत्तिः परमसर्वे परमविश्वे इति भाष्योक्तेतदंतविधिप्रयोजनेतत्समीचीने अवयवस्य स
र्वनामत्वे ततो जसो विहितत्वाभावेन शीभावानापत्तेः इति चरितार्थामिति विहितविशेषणाभावे समुदायस्य विकल्पेप्यवयव·
स्य नित्यसर्वनामसंज्ञामादाय नित्यशीभावापत्तेः यद्यप्येवं सति द्वंद्वे चेति निषेधवैयर्थ्यमपि स्ववचे तथाप्याभिसर्वनाम्न इत्यादौ
विशेषणं स्वीकृत्य जसः शीत्वत्तदाश्रयणे विवदमाने प्रत्येव सम्र्के किंच समुदायगतत्वोक्तं विवक्षायां कथं प्रत्ययार्थे सनिषेधः सा
र्थकस्तत्फलेवर्णाश्रमेतराणामित्यादौ सुडभाव इति मेतव्ये अत्र यद्वक्तव्ये तदग्रे वक्ष्याते बोधरूपतत्प्रवृत्तिकाल इति वस्तुतो बो·
धमात्रेण प्रवृत्तिः किंतु पदैकवाक्यतयान्वयार्हस्य सर्वस्योपस्थितौ वाक्यार्थबोधे हेतुत्वे पदादाहेकैकवाक्यतयान्वयार्हे परिभाषो
पस्थितौ तदेकवाक्यतया महावाक्यार्थबोधः तन्मूलकप्रसादयमिति ष्टंगग्राहकतयोपस्थाप्यमानवाक्यार्थबोधो बालदेसप्रवृ
त्तिः अस्यां च दशायां कादेरन्वेबंधतत्तानेस्प्रशाकमेव पाङ्ग्रिति प्रथेतनानवबोधकृतमनेकाल्व मित्यत्रानवबोधपदस्यावत्योगपरोऽसंते ६३

कास्थादित्यत्र शित्वदस्याशित्वयोग्यपरत्वेन फलेऽप्यस्तु न गौरवं किं चेत्संज्ञायोग्यशकारवत्त्वज्ञाने सर्वादेशत्वज्ञाने सर्वादेशत्वज्ञानेव प्रत्य
यादित्वज्ञानेन तत्पश्चाच्छकारस्येत्संज्ञायोग्यत्वज्ञानमिति चक्रकापत्तिः कारणेत्वक्रीत्या प्रवृत्तिकालेऽत्र बोधत्वज्ञाने फललाभे केचित्तु नान्व
बेथकृतमस्माकृप्यामित्यस्य वासरूपपरिभाषापवादत्वयोपसंजातनिमित्तोऽप्युत्सर्गोऽपजनिष्यमाणनिमित्तेनापवादेन बाध्यत इति
न धातुलोप इति सूत्रस्य कौस्तुभोक्तन्यायेन नतेन तस्य बाधः प्रवृत्तेत्व प्रथमतएवानेकाल्त्वात्सर्वादेशस्यापवादस्य निमित्तसमा
लीनत्वकृतन्यायस्याप्रवृत्तेर्विशेषश्चनाङ्क्षः अनेकाल् शित्सर्वस्येति सूत्रस्य शित्सर्वस्येति किमुदाहरणं इदमश्श नैतदस्ति शित्कर
णादेव सर्वादेशो भविष्यति इदं तर्हि जश्शसोः शिः जसः शीति भाष्ये लटः प्रथमस्येति सूत्रस्थे डाविकारस्याशित्करणं सर्वादेशार्थं
डाविकारः शित्कर्तव्यः किं प्रयोजनं सर्वादेशार्थमिति भाष्ये वाशिदन्त्यपदेशित्वान्न त्वेयत्वयोग्यपरमित्यपेक्षकृताविति न्यायेन नप्र
हृतमित्यंतस्यायेस्याने भवन्न प्रत्ययस्यास्मत्पोऽप्रत्ययस्येत्संज्ञायामित्संज्ञा न स्यादसत्यामित्संज्ञायां लोपो न स्यादसति लोपेऽनेकाल् यदाऽ
नेकाल् तदा सर्वादेशो यदा सर्वादेशस्तदा प्रत्ययो यदा प्रत्ययस्तदेत्संज्ञा यदेत्संज्ञा तदा लोप इति न उत्तरे भाष्येण तथात्वे सूचितमुत्तरभाष्ये
णतथात्वे सूचितमिति नत्वद्विरोधः विभक्तियोग्य इति ननूपसंजनिष्यमाणनिमित्तन्यायेन सिद्धे विभक्तित्वयोग्यत्वलक्षणाश्रयणं व्य
र्थमिति चेन्न न बहुव्रीहाविति सूत्रस्य भाष्यप्रामाण्येन निषेधविषये संज्ञाविषये चोपसंजनिष्यमाणन्यायाप्रवृत्तेः तत्र हि तकत्

वि॰ ६५ 64

पित्कत्वादावलौकिके प्रक्रियावाक्ये आमाकजारणा एव बहुव्रीहिपदं लक्षणया बहुव्रीह्यर्थो लौकिकप्रक्रियावाक्यपरमित्युक्तम्
उक्तन्यायेनैव पूर्वं सर्वनामसंज्ञायास्तन्निमित्ताकच्प्रवृत्तिसिद्धौ लक्षणाश्रयणे वैयर्थ्यं स्पष्टमेवाप्रातिपदिकस्यैव प्रकृतित्वादिति
अकज्विधौ सर्वनामपदे तत्प्रकृतिकसर्वेनेन लाक्षणिकं नेदं मदसोरकोरककारकत्वाव्यभिचारात् ननु समस्तार्थे मे तत्स्यादिति चेत्त
न्ये काकचौरविशेषप्रतिपादनपरभाष्यादेवोक्तार्थस्वीकारात् अत एव तल्लाक्षणिकमेवेत्युक्तम् ङ्याप्प्रातिपदिकादिति सूत्रे अक॰
ज्विधौ प्रातिपदिकाधिकारस्यानोपयोगः तस्यैव स्पष्टनत्वात् तत्र सर्वनामपदेन लिंगविशिष्टपरिभाषया ऽस्यैतस्यापि ग्रहणाद्
वतीशाब्देङीपः प्राक् अकविभवतकीति हृपे नवप्रत्ययः परः प्रयोक्तव्य एवेति नियमेन मध्येकजत्तु तान्निः तयकेत्यादावि प्रकृतिप्र
त्ययमध्येप्यकच्प्रवृत्तिसंभवात् शाब्दादिविधानेनोक्तनियमस्यानित्यत्वकल्पनात् सर्वनामेति सर्वेनत ज्ञानाय व्यवहितेनतरका
लप्रवृत्तिकत्वस्यार्थः प्रत्ययोत्तरत्वेन व्याख्यानादिति अस्यान्तेत स्वार्थिकाप्रविधानार्थमित्यनेनान्वयः महाविभाषासंबंधस्यावश्य
कत्वेनेति अस्य लक्ष्यानुरोधादिति शेषः अत एवेति स्वतन्त्रैः पूर्वमप्युक्तत्वमेवेत्यर्थः ननु स्वतन्त्रत्वेनेतरमप्युक्तत्वात् प्रभ
शाब्दान्त्वेतान्स्वार्थैः यवितनः सम्यग्मतत स्वस्त्रभयवेति हृपेसिद्धान्ति नहि अवयवार्थे कायजं तस्योभयशब्दस्य सर्वादिषु पाठः न
स्वार्थिकायजेतस्यैतत्रमानमस्तीति चेन्न स्वतन्त्रत्वेनेतरमप्युक्तत्वान्नोनित्यमित्यभिधानादित्यस्य संबंधेन तस्य तत्प्रकृतिकसर्वेनेल॰ ६५

त्वगणयोर्मानाभावेनस्वपिपरत्वउभशब्दादयचितस्यसमसमीरूपस्यस्वपउभशब्दप्रकृतिकस्यसर्वनामप्रकृतिकत्वाभावेनत्रलाद्यना
पत्तिरित्याशयात् घकालतनेष्वितित्वापकेत्वसार्थकत्वइतिविषयेनचोभशब्दपाठस्यत्रलाद्युत्पत्तिरपिप्रयोजनमस्त्वितिवाच्यं
तथासत्युभस्यसर्वनामत्वेकिंप्रयोजनमकजर्थंपाठःक्रियतेउभकौकिमुच्यतेऽकजर्थमिति नचुनरत्नान्यपिसर्वनामकार्या
णि अन्याभावोद्विवचनटाड्विषयत्वादित्यादिभाष्यग्रंथसंदर्भस्तवितप्रयोजनोत्तराभावाभिप्रायविरोधात् आपुद्दानपवेति नो
तोदात्तः विवेनोनोतोदात्तस्यमामत्वेनोदात्तग्रहणवैयर्थ्यात् ननुकउदात्तनीमनसस्वरस्यत्रभवतिउभयोऽन्यत्रोभयशब्दोस्याम्यत्रभवतीत्र
तिभाष्ये अस्योभशब्दस्यान्यत्रद्विवचनाभिन्नेपरत्वउभयइतिरूपंभवति अयच्भवतीतिफलितोऽर्थः तथाचायच्प्रत्ययस्यद्विव
नभिन्नेपरत्वएवविधानेनसुतरामतेः पूर्वमेवायजितिपूर्वग्रंथासंगतिः भाष्यस्तवितात्कजतिरिक्तसर्वनामकार्याभावविरोधश्च
उभयत्रैत्वात्प्रउभशब्दात्समसमोद्विवचनोत्तरमेवचलनत्वाद्द्विवचनेवसतिअयजभावेनसर्वनामप्रकृतिकत्वसम्भवेत्वाभावेनत्रलाघनायत्वात्
दर्थंउभशब्दपाठस्यावश्यकत्वादित्याशंक्याह द्विवचनविषयत्वाभावसंभावनेति परिनिष्ठितेप्रयोगेऽद्विविशेषः तथाचान्यत्रेत्य
स्यद्विवचनपरत्वाभावइतिनार्थः किंतुपरिनिष्ठितप्रयोगेद्विवचनविषयताभावसंभावनायामित्येवार्थइतिनपूर्वोक्तदोषद्वय
मितिभावः नन्वेवमप्युभावित्यत्राप्ययच्स्यात् अयचितोद्विवचनेपिपरिनिष्ठितप्रयोगेउभशब्दस्यद्विवचनपरत्वाभावात्

अथ पदान्वयव्याख्यानादित्यत आह उभयशब्दस्यैवेति गवत्वनीयमार्थिकोऽर्थो न तु वाच्योऽर्थः अन्यत्रैतस्य प्रकृतद्विवचनभिन्नेयवशा-
वि. क्तेनैतद्विवचनपरताभाव इत्यर्थलाभात् अस्यैतस्योभयशब्दस्यैतर्थेक इदानीमस्माभ्यं भवतीत्यादिभाष्यग्रन्थस्यानन्विता-
६५ र्थतापत्तेश्च भाष्यादौ तद्दर्थत्वस्योभयशब्दस्य परिनिष्ठितप्रयोगे द्विवचनभिन्नपरत्वे उभय इति रूपं बोध्यमिति अत्रैरनेकाव इति सूत्रस्य गा-
65 तिकारकपूर्वस्येष्यते इत्यस्येवार्थिकार्थपवतात्पर्येन वाच्येऽर्थे ननु यत्र द्विवचनविषयत्वाभावसंभावना तत्रैवायजिति नियमोऽर्थः उ-
भावित्यादौ हलेरभावेन हलिविषयविहितस्यायचोऽप्रवृत्तेः अकर्जेतान्नतापत् अनभिधानादित्यकरमेवेत्याशंकातत्फलमाह उभ-
यो वीस इति नन्वेवं सति हलिविषय इति यर्थे उभावित्यादौ द्विवचनपरत्वादेवायचोऽप्रवृत्तेरिति चेत्सत्यं एतत्फलितार्थकथनमेव
हलिविषय इति एवं चान्यत्रेत्यस्याभावित्यपि प्रत्युदाहरणं दातेः शाकं तत्परत्वविषयाभावे इति परिनिष्ठितप्रयोगे तत्परत्वाभाव-
संभावनायामित्यर्थः यथाश्रुतमूले तु न युक्तं द्विवचनपरताभाव इत्युक्तौ संशतिद्विवचनपरताभावाभावेनोभयत्रेत्यादावयजा-
नापत्तेः न चोत रंगत्वाद्विभक्त्युत्पत्तेः पूर्वमयजापत्यातद्वयस्योपत्तेः इत्यादौ तु नेति अस्येतत्स्वार्थिकायजिति शेषः ~~निर्देशेनेति~~
~~इदमुपलक्षणम् अस्येतत्स्वार्थिकायजिति शेषः~~ निर्देशेनेति इदमुपलक्षणम् अस्येतत्स्वार्थिकायचोऽन्तरंगतेस्तदुत्पत्तेः पूर्वमे-
वोत्पत्तेः स्वीकारेणावयवार्थकायचः पूर्वं स्वार्थिकायज्भशब्दस्य प्रकृतिकसंबंधताभावेनोभाद्यदात्त इत्यस्यावयवार्थकायज्विषया ६५

यकस्यानिर्विषयत्वापत्तेः अनभिधानमेवेति अत्र प्रमाणं तकप्रत्ययस्य द्विवचनत्वमाश्रितो भशब्दप्रत्याख्यानपरं भा
ष्यं तथाहि द्विवचनशब्दस्य तत्संज्ञकपरत्वे रूपपर्यवसानं भवति द्विविशिष्टार्थवाचकपरत्वेन समर्थनेऽपि फलभेदादनभि
धाने नन्वभशब्दपाठो मास्तु नवकप्रत्ययाप्राप्तेः इति विषये सुबुत्पत्तेः पूर्वमेवाग्रजत्वात्स्त्रीकारेणाकप्रत्ययस्य सम्बुत्प
त्पन्नेतरमेवास्तत्वात्पूर्वमप्यजेतस्य सर्वादिषु पाठेन ततोऽकच्प्रत्ययसहितेः नवाप्यजेतस्य सर्वनामत्वे उभशब्दस्य सर्वनाम
त्वात्ततः कप्रत्ययाप्राप्तिरितिवाच्यं सुबुत्पत्तेः पूर्वमेवाग्रजत्वात्स्त्रीकारेणोभशब्दस्यास्य वा तत्वेऽपि न ततः कप्रत्ययप्राप्तिः
प्रत्ययः परः प्रयोक्तव्य एवेति नियमेनोभशब्दायवावस्थेकप्रत्ययासंभवाच्चेत्याशंक्याह अपवादोपीति कुतो न वाच्य इत्यतः
तत्र हेतुमाह उपजीव्यत्वेनेति परिनिष्ठिते प्रयोगे द्विवचनपरत्वाभावो हि अग्रजत्वपजीव्यः यदि वा यदि कृतेऽकच्स्यात्तदास्वार
थिकाग्रजेनसाहिनविशिष्टबोधकत्वेन ततो द्विवचनाप्तौ द्विवचनपरत्वाभावस्य उपजीव्यं व्याहन्येतेति कप्रत्ययस्यैवप्राप्तिरि
त्यर्थः नन्वपवादेऽपवादिनां राद्धेकेकध्येकइत्याशंक्याह अपवादस्त्वयचेति उपजीव्योपजीवकभावादत्यन्तस्पर्थः तथा च द्वि
वचनपरत्वाभावसंपादनद्वारा उपजीवकप्रत्ययविघातकाकचोऽयवूननिमित्तं भवतीति नाकः प्रवर्तनमित्यर्थः अत एवा
यमजेनव्याहन्येरिति इदमुपलक्षणं हलन्तस्तु पसर्जेनेकुन्तादियोगासंभवात् ततः पूर्वेण योगेन कजित्यवेति प्रज्ञातार्थ

वि॰ योविशिष्टस्वार्थे इति स्वेतात्कप्रत्ययविधानेऽपि विधानेऽप्यभिधानस्वाभाव्यान्नत्वैवं विभक्तिविशेषस्यानुपादानाच्च अज्ञाततादि

विशिष्टप्रातिपदिकार्थे एव अकप्रत्यय इति भावः पर इत्यादि निषेधाश्च बलीयानिति ननु स्वरान्ते वैद्युतादिद्वनोः स इति विप्रति

९९ षेधेनेति विप्रतिषेधानुपपत्तिः उक्तन्यायेन विकल्पस्य बलवत्वादिति चेन्न अद्वनोः स इत्यस्य निषेधबाधकत्वेन निषेधस्य सं

66 कल्पतात् नचैवमप्याकडारादेका संज्ञाया बाध्यबाधकभावादिभावादिदमयुक्तमिति वाच्यं विजातीययोस्तदभावेपि स

जातीययोस्तदभावेपि सजातीययोस्तदङ्गीकारात् नित्यविकल्पयोः संज्ञयोरेकसंज्ञाधिकारबहिर्भूतयोरपि तदङ्गीकारादा भा

वाभावयोर्विरोधेन तयोः साक्षाद्विरोधात् साक्षादविरुद्धयोरेवैकसंज्ञाधिकारबहिर्भूतयोस्तयोर्बाध्यबाधकभावाभावः

साक्षाद्विरुद्धयोस्तुल्ययोः साम्येव यथातपरस्तत्कालस्याणुदित्सवर्णस्येत्यनयोः अत एव सर्वादीनां वैकल्पिकी सर्वना

मसंज्ञा नित्यसंज्ञां बाधते नन्वेवं सर्वे इत्यादौ शीभावोन्तरेन स्यात् सर्वे परेत्यादिना जसि परतः सर्वनामसंज्ञाविकल्पविधाने

न जसः सर्वनाम्नो विहितत्वाभावादित्याशंक्याह सर्वे परेत्यादिरिति तथा च सर्वे इत्यादौ जसः सर्वे प्रवर्तमाने सर्वादीनीति तद्विहितत्वात् स

र्वनामसंज्ञामुपजीव्य शीभावप्रवृत्तिरिति भावः नन्वसिद्धं बहिरङ्गमित्यनेनान्तरङ्गेऽकर्तव्ये प्रवर्तमानबहिरङ्गस्यासिद्धत्वेनाभावबोधः

नात्र दोष इत्याशंक्य समाधत्ते असिद्धमिति नन्वन्तरङ्गप्रवृत्त्यन्तरे प्रवृत्तिनिमित्तसंज्ञाबाधीनबहिरङ्गप्रवृत्तेरन्तरङ्गपरिभाषयाति ९९

वारणाभावेपिबहिरंगावैकल्पिकीसर्वनामसंज्ञाऽसंभवादेवनप्रवर्त्तते नहिनित्यसंज्ञांतरंप्रवर्त्तमानमपिपूर्वपरेतिशास्त्रेसर्व
वेनामसंज्ञायाअभावेबोधयितुंक्षमे भावाभावयोर्विरोधात् विधायकशास्त्रभेदेनसंज्ञाभेदेतुपूर्वपरेत्यादिनाशास्त्रविहितसंज्ञ
ज्ञायाअभावेबोधयितुंक्षमे भावाभावयोर्विरोधात् विधायकशास्त्रभेदेनसंज्ञाभेदेतुपूर्वपरेत्यादिनाशास्त्रविहितसंज्ञायाअभाव
बोधनेपिसर्वादौनीत्येतद्विहितायाअभावाबोधनात् तामास्त्वितिनित्यसंज्ञीभावोऽर्वाग्दृत्याशंक्याह तदन्तरमपीति शास्त्रभेदेन
संज्ञायाभेदाभावेपिजातसंज्ञायायत्वसर्वादिविबोभयोरपिअभावबोधनेसंभवति त्वगादिनेवजातान्निहन्तेरंगीकारादितिभावः
ननुप्रथमचरमेत्यादेर्जसीतिविषयसप्तमीतयाचांतरंगबहिरंगयोर्युगपत्प्राप्तोऽन्तरंगबलीयस्त्वस्यात्रविषयोस्त्येवेत्याशंक्याह ज
सीति तदन्तरमेतद्विषयादिति तथाचप्रातिपदिकसंज्ञोत्तरमेवसंज्ञीभावविषयत्वेनतदन्तरमेववैकल्पिकीसर्वनामसंज्ञानि
त्यसर्वनामसंज्ञायाःप्रातिपदिकसंज्ञासमकालमेवेतिनतयोर्युगपत्प्राप्तिरितिभावः आनुमानिकस्यानवेति अन्तरंगबलीय
स्त्वनयाः सिद्धेबहिरंगमित्यनयावेत्यर्थः नत्वाक्षेपयोरदेशेनित्यपाक्षिकयोर्युगपत्प्राप्त्यसंभावः ततएववांतरंगबलीयस्त्वस्या
प्रवृत्तिश्च तथापिकार्यकालपक्षेप्येवतयोर्युगपत्प्राप्तिः संज्ञीभावप्रवृत्तिकालएवनित्यसंज्ञाप्रवृत्तेरित्याशंक्याह सर्वनामसंज्ञा
यामिति उक्तयुक्त्येति सर्वनाम्नोविहितत्वेनसंज्ञीभावसिद्धेरित्युक्तयुक्त्यर्थः यद्यपिकार्येविप्रुगपत्प्राप्तिर्गृहीतेऽन्तरंगबली

यइतिनित्यसंज्ञाप्रवृत्तावपितदुत्तरत्वबहिरंगइतिपूर्वेणोक्तरीत्युक्तयुक्त्यास्यपादाः अन्यथांतरंगंबलवदितिन्यस्यविषयाभावेऽपिशास्त्रितिपादि
वि. कसंज्ञासमकालमेवसर्वनामसंज्ञांगीकारात्तन्नित्यविधित्वंनेस्यात् तथाप्यंतरंगंबलवदितिन्यायेनबाधितस्यपुनरप्रवृत्तिरितित्यभिप्राये
६७ णोक्ते अतएवेति उक्तयुक्त्यानित्यसंज्ञायाःवैकल्पिकसंज्ञायाबाधायोगादेवेत्यर्थः नातिप्रसंगइति नघट्टत्वस्यादिमात्रइतिनिषे-
67 धोपिबोध्यः नन्वेवंप्रत्याहाराग्रहणेऽदिहेतित्वेनतपरग्रहणेनव्यर्थमित्याशंक्याह तपरग्रहणेनेति अवयुत्यावयवेनैकदेशेन अ
वयुत्येतित्यवेतेवेति अवयुत्यानुवादइतिपाठेतवयुतेःप्रत्याहारैकदेशस्यानुवादइतिषष्ठीसमासः नन्वस्यानिवदित्यतिदेशाश्रा
श्रितायानिरवकाशत्वाभावेत्यनुक्ते ङयेइत्यादेःसावकाशत्वाभावेत्याशंक्याह अनभिधानमेवेति वस्तुतोनेदंयुक्तं अनभिधानेप्रमाणा
भावात् धातोश्चङयेप्रत्ययास्विङः कृतश्चेतिभाष्यप्रयोगाच्च अस्मेतुसर्वनामसंज्ञायांकार्यकालपक्षएवतत्रत्वेवसंज्ञायाःकार्यनि-
मित्तनिमित्तेतिते अतएवपूर्वपरेत्यादिविधिनार्थं अन्यथाप्रवेनित्यसर्वनामसंज्ञायांततएवनित्येशीभावापत्तौनतद्वैयर्थ्यं नवास्मि
न्पक्षेसर्वनाम्नोविहितत्वाभावेनोभयेइत्यादौशीभावानापत्तिः विहितविशेषणत्वाप्रयणात् अदंतात्सर्वनाम्नःपरस्यप्रत्या
सत्यातत्सर्वाभागसंज्ञानिमित्तस्यजसःशीत्यादिरूपेणवाक्यार्थबोधांगीकारेणविहितविशेषणफलसिद्धेः नांतरंगंबलीयइत्या
स्याश्चविषयइत्याद्युक्ते तदप्रवृत्तावपिनित्यसर्वनामसंज्ञायाः सर्वनामसंज्ञायाःसर्वप्रवृत्तिस्वीकारेणतयादेशोऽभयप्रतिषेधइ ६७

निवार्तिकवैयर्थ्यात् एवं परेत्यादिव्यपेतेतदभावमात्रबोधकमित्याशयेनोक्तं प्रथमादिशब्दविषयकाशास्त्रविभाषायामगतेः प्रथमा
दिशब्दविषयकाशास्त्रविभाषायामगतेः प्रथमादिशब्दे सर्वनामसंज्ञाविकल्पसामर्थ्येन चास्मदर्थकल्पनैव ज्यायसी तदनन्तरम
प्येतन्त्यदन्तेत्याशयेनोक्तं कार्यकालपक्षाश्रयणेनैवोपपन्नौ पूर्वादिषु जानन्तत्रविहितविकल्पनायाश्च शक्तत्वात् संज्ञाविषयेऽनिषेध
विषये वा ऽक्लृप्तस्योपसंजनिष्यमाणन्यायस्य पूर्वादिष्वाश्रयणमप्रगतिकगतिः उभयशब्दे तूपसंजनिष्यमाणन्यायावकाशः
द्वितीये इत्यादौ तद्वारितार्थ्यात् एवं जसीत्यस्य विषयसप्तमीत्वमप्रगतिकगतिः तथा च नित्यविकल्पयोः संज्ञयोरन्तरङ्गबहिरङ्ग
भावान्तरताह्निकल्पाश्रितयादेशइति वार्तिके प्रवृत्ते वस्तुतस्तु जसि विकल्पविषयेऽपि प्रकृत्या प्रदानवार्थे नित्यसंज्ञाप्रवर्तते एव
शीभावः परे वैकल्पिकी संज्ञामाश्रित्य प्रवर्तते न नित्यं अन्यथा विकल्पवैयर्थ्यापत्तेः नित्यविकल्पयोर्विधायकशास्त्रभेदेन भेदा
न विरोधः तथा च तयादेश इति वार्तिकोऽस्थितिः स्थानिवदतिदेशप्रापितायाः इत्याशयेनोक्तं द्वयशब्दे वारितार्थ्यात् तदन्तमित्यानः
स्यानित्यत्वात् अत एतस्येत्याशयेनोक्तं एवं वेदमित्यादौ पूर्वोत्तवद्भावेन सोऽङ्गत्वमताया आश्रित्य प्रवर्तमानस्य सेत्वादेरन्तरङ्गपरिभाषया
बाधदर्शनात् स्थानेऽयत्यादौ समकालप्राप्तिकस्यापि स्थानिवद्भावेनागतमाश्रित्य प्रवर्तमानस्य गुणस्यान्तरङ्गपरिभाषाबलेन
यणा बाधदर्शनाच्चैतेषां देशविकृतन्यायस्य लौकिकत्वेऽपि स्थानिवदतिदेशस्य प्रवृत्तत्वादिमाङः तदन्तयादिति पूः शब्दार्थमात्र

वि॰ विवक्षायां लिंगांतरेषूदाहरणासंभवात् स्त्रियामेवोदाहरणोपन्यासोप्यर्थः स्यादिति भावः एकोन्यार्थे इति कस्यचिदभियुक्तस्य
६८ वचनेन तु कोशः तेनैकादिभिन्नैकशब्दः समानार्थः तेन तयोर्योगे तुल्यार्थैरिति तृतीया एका मातेत्यत्र साधारणार्थः नन्ववधि
नियमो व्यवस्थेत्युक्तं तस्य पूर्वादिशब्दार्थत्वाभावात् देशावधिनः सर्वनामत्वानापत्तेश्च नहि काशी प्रयागादेव पूर्वा नत्वा
मांतरादित्यवध्येर्नियमोस्तीत्याशंक्याह नियमेनावधिमपेक्षत इति उक्तेरिति नियमेनापेक्षमाणोपि पूर्वंषतो नावधिरिति
भावः केचित्त्ववधितमेतद्व्यावर्त्यंडवेचे स्त्रिभावस्तु पूर्वादिभ्य इति विकल्पात्स्वेन तु महत्त्वमप्येवं तस्माद्दाक्षिणगायकाद्यत्वे
वयस्तूदाहरणमित्याहुः ननु कूटस्थस्वरशब्दस्य केवलरूढत्वेपि अवयवार्थाभावादेव संज्ञायामभावादसंज्ञायामित्यपार्थमित्या
शंक्य योगरूढिमाश्रित्य समाधत्ते सुमेर्वेवधिकेति तात्कालिकेति पाठः तत्तदवधिकेति यन्निरूपितं तदंशस्य पूर्वत्वा
दितदवधिकेत्यर्थः अपरशब्दोयं रूढो न तु नञ्समासः परापरशब्दयोः समानार्थत्वात् अंतरमवकाशावधीति अवकाशोप
योः तरेदेहि अवयोमासोंतरेदेयं परियानैः तरेशाटकः अंतर्द्धौ यनांतरितः सूर्यः भेदे उदरमंतरं कुरुते यदंतरः सिंहस्
गालयोर्द्वयोः तादर्थ्ये तवांतरे करणे गृहीते छिद्रेऽंतरे पश्यति आत्मीयेंऽतरेजनाः विनार्थे उदाहरणं मृग्यं बहिर्
र्थे अंतरे वेशालगृहाः अवसरेंऽतरज्ञः सेवकः मध्येऽनयोरंतरे शैलाः अंतरात्मनि अयोंतरआत्माऽनेदमयः वकारा ६८

68

त्सदृशार्थोऽपि यथास्थानेन्तरतमः विनाबहिःशब्दयोरव्ययत्वेऽपि वार्थयोगमाश्रित्येदं नन्वकजाद्युदात्तत्वादाविति यकजाद्युदात्त
त्वेत्वनित्यत्वं तयोः कर्तव्ययोः सतोः सर्वादीनीति नित्यसंज्ञाश्रयत्वात् सान्तशीभावो यद्यपि नित्यः शीभावे विकल्पविधानसामर्थ्यात्
वर्णाश्रमेतरेऽस्मिन्नित्यादौ तु नैते इदं वेति नित्यसंज्ञानिषेधात् विकल्पस्य वशीभावमात्रफलकत्वात् एवं प्रथमेऽस्मिन्नित्यादावपि नन्वे
बोधकत्वरूपेति लोके इति शेषः वस्तुतस्त्वेकार्थीभावकल्पनातः एवमेवाकचः अभिधेयार्था अन्तरंगान्यपीति व्याप्यस्य संज्ञातिरि-
क्तान्तरंगत्वाभावकत्वविषयः प्रयोजनिरिक्तनिमित्तविनाशकविषयो वा ननु सर्वसमासेऽपि श्रूयेतेत्यस्याति भवकानित्येवरूपं तत्र
याप्रदर्शनीयः अतिक्रान्त इत्यादिकं तु न प्रदर्शनीयं प्रकृतासंगतेरित्याशंक्याह अतिक्रान्त इत्यादीति तथा चातिक्रान्तो भवकं
तमिति लौकिकविग्रहवाक्ये वा लौकिके प्रक्रियावाक्ये प्रवर्तमानोऽकच् न्यूयाति भवकानिति समासे श्रूयतेऽन्तत्यात्केऽपि तेति
लौकिकविग्रहवाक्ये वा लौकिके वाक्ये प्रवर्तमानोऽकच् नूनकापितक इति समासेऽपि श्रूयेतेति मूलार्थ इति भावः अत्यन्तरंग
एव चेति भाष्यकृता करिष्यमाणसूत्रप्रत्याख्यानस्य सङ्ग्रहकदम्बितं तमित्यर्थः भाष्ये त्वनित्यत्वमिति एवं हि तत्र भाष्ये कायमकारः
श्रूयते न कविक्रूयते लोपोऽसम्भवति यदि न कविक्रूयते किमर्थमिदमुच्यते न लोप एवोच्यते नैवं शक्यं लोपे सति गुणः प्रवर्तेत
अतो वनसतिप्रकारलोपस्य स्थानिवद्भावाद् गुणो न भविष्यति ननु वलोपेऽपि न यातितिनिषेधो भविष्यति आर्धधातुकनिमित्ते

लोपेप्रतिषेधः नवैषआर्धधातुकनिमित्तोलोपः अपिचप्रत्याख्यायतेखल्वपिसंयोगः तस्मिन्प्रत्याख्यातेगुणः स्यादेवेति एवंच
वि· प्रत्याख्यानविरुद्धफलकसूत्राशयकल्पनेहन्निकाराणामनुचितमितिसूचितेतदाह एवंचेति कैयटेस्पष्टमिति नन्वेवंसूत्रम
८९ नेतिसर्वादियत्नादौस्मैप्रसंगः बहुव्रीहिग्रहणस्योपसर्जनोपलक्षणत्वात् संज्ञायांतुव्यवस्थायामसंज्ञायामितिपृथग्ग्रहणान्निषे
69 धोबोध्यः अंतर्गणकार्यमप्यनुपसर्जनादित्साकारणत्कारणवनुपसर्जनस्यइह्यावित्यर्थेनपरिहर्तव्ये सतमप्यर्थाधिकाराश्र
यणेनपरिहर्तव्ये अमेतद्यिपादिशिविख्याषोपसर्जनप्रतिषेधेनाप्येतत्सिद्धमितिनबहुव्रीहाविति सूत्रस्यभाष्येणनकोपधायाइ
त्ययंयोगःशेवज्ञावमात्रस्यविषयेनतउत्तरमापस्ययोगस्यविषयइतिनकोपधायाइतिसूत्रस्यभाष्येणसूत्रेष्वेवहि तत्सर्वेपहतौ
यत्रवार्तिकेऽत्राभिप्रक्तोमावसंज्ञोपसर्जनप्रतिषेधोपिसूत्रकृत्संमतएव अतएवबहुव्रीहिपदस्यतदस्यतदर्थालौकिकवाक्य
परत्वेलक्षणयास्वीकृत्यतत्कापितृकइत्यादावकजभावः फलमित्युक्तंभाष्ये तथाचसूत्रकृद्भाष्यकृन्मतेविरुद्धएव उत्तर
मनिस्सृतिश्चप्रबलेत्येवतत्त्वे विभाषादिगितिसूत्रस्थभाष्येतैकदेशयुक्तिरित्याहुः ननुसर्वार्थवाचकत्वेसर्वविश्वयोरेवनत्वन्येषामपी
त्यतआह प्रसिद्धस्त्रीयेति तथाचस्वप्रवृत्तिनिमित्तसमानाधिकरणकृत्स्नधर्माश्रयवाचकत्वेसर्वार्थवाचकत्वे मानाभावइति तेनत्य
दादीनीत्येकशेषोपिसंज्ञोपसर्जनयोर्न त्यदादीनिचेतिसूत्रेसंज्ञापिन नामपदसमासेनेति घटपदेघटस्यनामेत्यप्रयोगादितिभावः ८९

पूर्वादिसंज्ञाहायेति ननु दिग्वाचकपूर्वादीनां न सम्बन्धिनिमित्तसमानाधिकरणान्तस्य धर्मोऽस्य वाचकत्वमिति चेन्न सर्वे
षामेव वर्षाणां मेरुरुत्तरतः स्थित इति प्रमाणेन तेरापि न तत्तद्वर्षवासिनां सूर्योदयाधिकरणत्वेन परिदृश्यमानभागविशे
षाणामेव तत्तद्देशवासिनः प्रति पूर्वादिकत्वाङ्गीकारेण सर्वार्थवाचकत्वोपपत्तेः ननु दिग्योगाश्रिबुवासके ति तत्सर्वादीनां स
र्वनाम संज्ञाऽसर्वार्थवाचकत्वादित्याशङ्क्याह संज्ञायामुक्तेयेति प्रभिवत्सेति न्यायमूलकेति ननु स्यन्यायस्यत्र
दिति चेत्तत्र प्रभिवक्षेति न्यायस्य पदकार्यविषयकत्वमन्ये [illegible] तेत्वहृयमेव तथा चायं न्यायः प्रातिपदिककार्यविषयेऽपि प्र
तयुक्तसंज्ञाविधायके तयादेशाभावः युष्मदस्मदोरङसाविल्यादौ ग्रातताद्यभावश्च प्रयोनिर्देशः प्रातिपदिककार्येप्येतत्प्रवृत्तेना
लिंगे सर्वनामपदवर्णोशपदवेति इतगे शास्त्रयोगार्थानुगुणनामेव संदिश्यत इति भावः अन्यथा महासंज्ञाकर
णानुपयोगात् एकपदोपस्थाप्ययोरिति यत्र परिशेषाकृतौ ह साधनत्वयोर्लिङ्गसंख्याप्ययोः परस्परान्वयस्य दृष्टत्वात्ततः पृथ
कृफलव्यापारेशक्तिवेतयोः [illegible] विधेयभावेनान्वयापत्तेः पृथगुपस्थितयोस्तयोस्तथान्वयस्यौत्सर्गिकत्वादिति मंजूषा
योः फलव्यापारयोः पृथक्शक्तिवादस्य स्वयमपिदूषितत्वात्स्थितमेतदिति पाठके [illegible] तोक्तं तत्र कृतिः साधनत्वयोर्लिङ्गत्वाख्या
तत्वादिशक्ततावच्छेदकभेदेन शाब्दबोधविषययोस्तयान्वयाङ्गीकारेऽपीतरत्र तथान्वयेऽमानाभावात् मंजूषायां पश्य

गुपस्थितयोस्तथान्वयसौन्दर्गिकत्वादेकपदोपस्थाप्ययोरन्वयांगीकारेप्येवमन्वयःस्यादित्येवंपरः अत एव वषट्कर्तुः प्र-
वि· ७० 70 थमभक्षः इत्यादौ भक्षणाधपदयोर्निर्देशविधेयभावेनान्वयः यद्यप्येवकारार्थयोरन्ययोगव्यवच्छेदयोः परस्परमन्वयोस्ति
तथापि निर्देश्यविधेयभावेन सः अगतिकगतिश्चेति न दोषः निपातातिरिक्तनामपदोपस्थाप्ययोस्तथान्वयांगीका-
राद्वा अन्यतरविधियोगेनेति यत्र च रिभेदः पलाशश्च बाहुः कल्पद्रुमश्चेत्यते इति पदश्लेषोदाहरणे ऽरीणां भेदः पलेवा
श्रातीत्यरिभेदः पलाशसो बाहुः रिभेदसेतकः पलाशसेतकश्च कल्पद्रुम इत्यर्थके परस्परमुद्देश्यविधेयभावेनान्वा-
न्वयसहृदयत्वादिदं चिंत्यमत एव दुःहृयदं श्रुतिकटु च्युतसंस्कृतीति पददोषविशेषलक्षणस्थे ननु श्रुतिकटुप्रभृतिशब्दा-
नां लक्षणपरत्वे विभागपरत्वाभावात्तदानुपस्थितौ कथं लक्षणवाक्यतानिर्वाह इत्याशंक्य रूढियोगाभ्यामुभयार्थोपस्थि-
तौ लक्ष्यलक्षणयोरपि प्रत्ययः यथा घ्राणरसनचक्षुस्त्वक्श्रोत्राणि इन्द्रियाणि भूतेभ्य इति गौतमीयेन्द्रियलक्षणसूत्रे इ-
ति काव्यप्रदीपकृता व्याख्यातमिति पाठकेनोक्तं तत्र श्रेरिनेदं पलाशशब्दो हि योगरूढो भेद इत्यादिशब्दवत् न तु योगरूढो
रूढो हलयोर्भेदः पलाशमात्रत्वात् सम्भवेनामशब्दस्य योगरूढः योगरूढस्य लवशीलोक्तो नियम इति नोक्तश्लेषोदाहर-
णविरोधः काव्यप्रदीपकृदुक्तिस्तु उक्तनियमविरोधेन प्रौढिवादरूप इति दिक् ननु सर्वनामपदस्य योगरूढत्वे न तदनुगुणा ७०

नामैव संज्ञितकल्पनात् नन्वुपसर्जनादीनां गणाद्बहिर्भावस्तथा चातिसर्वीयेत्यादौ समुदायस्य संज्ञाऽर्वीरा तस्य प्राधान्ये
नसर्वीयप्रकृतिनिमित्तत्वं सर्वोपस्थापकतादित्याशंक्याह तदेतनेइति प्रवयवव्यवहारेति व्याख्यानादेतावयवव्यवहारोक्तसर्वो
र्थवाचकानामेव संज्ञितकल्पनायामुपसर्जनस्य सर्वादिबहिर्भावप्रयोजनाद्रापनितः योगार्थानन्वगुणत्वेनतस्यतत्वेमानाभा
वादितिभावः येनविधिरितिसूत्रेकैयटेनोक्तंपदेदूषयति यत्तेनेति आदेयेविनैवोक्तरीत्यानिर्वाहसंभवेनेत्यर्थः इतोलघु
रिति वस्तुतःशास्त्राशास्त्रविवेकन्यायोयन्संयानादापपदोयेनतन्दसमयव इतरविशेषणतेनार्थोपस्थापकत्वमिति ते
षांचनइत्यादौतत्कुह्स्येनरविशेषणतयास्वार्थबोधकत्वेपितत्थोपस्थितिजनकत्वेउपस्थितेशक्तिग्रहासमानविषयत्वात्
नन्वेवंपरस्मैभाषाइत्यादौस्मैभावोनस्यादितिचेन्न ग्रंतरंगत्वेनस्मायादिषुकृतेष्वेवसमाससंज्ञाप्रवृत्तेः समासस्यविप्रयोज
कत्वाभावेनांतरंगानपीतिन्यायाविषयत्वात् राजकुमारीपुत्रइत्यादौ ह्रस्वाभावप्रकारेणनिर्वाहसंभवाच्च ग्रत्रसंज्ञोपसर्जनी
भूताइतिवार्तिकारंभादन्वर्थसंज्ञाश्रयणमेवश्रेयः संज्ञोपसर्जनीभूतप्रथमचरमादीनांसंज्ञाव्यावर्त्यइतिबोध्यं नावयवा
नामिति केचित्तु मासस्त्वीयेत्यादौस्मायादिवारणायविहितविशेषणाश्रयणेगौरवात्समुमोनिर्देशानुरोधाच्च तृतीयासमा
सेविद्यमानसर्वादीनांनिषेधः सचशब्दोक्तरीत्यापाठाद्बहिर्भावद्वारैवेतिसर्वाघेततप्रश्नोक्तसर्वनामसंज्ञासमुदायेनप्रवर्तते

स्पहैवेदंविभाषादिग्गितिसूत्रेबहुव्रीहिपदमेतयोः अतएवभाष्येचसूत्रेसमासइतिवर्तमानेपुनस्तदुपादानेयोगविभागेनवाक्यनिषेधा
वि० र्थमित्युक्तं प्रथमार्थकसप्तमीनिर्देशात्तदनुपपत्तिरित्याहुः अवयवस्यानिषेधेफलाभावइति केचित्तुविहितविशेषणानाश्रय
७१ णेएवंसतिसंभवतीतिवृत्तौअमेतराणामित्यादौसत्त्वभावस्तत्फलमित्याहुः अन्यथातत्रैवेति अवयवनिषेधवादिनस्त्वेवमर्थः
71 अतएवेति उक्तरीत्याऽवयवेभ्यःपृथक्तदनुपपत्तेरेवेत्यर्थः अन्यथासमुदायस्यशीभावेकर्तव्येएवविकल्पोऽवयवस्यनित्यंसर्वना
मसंज्ञामाश्रित्याकचोऽपवादत्वात्तयातदसंगतिः समस्तावयवस्यसर्वनामत्वेपितदर्थमात्रेकुत्सान्वयाभावेनाकजभावः समुदायकु
त्सामादायत्वकच्तुसमुदायस्यासर्वनामत्वादितिभावः नन्ववयवकुत्साविवक्षायामुक्तरीत्याऽभावेऽकचःप्राप्तिरेव नेति
शीभावेप्रतिविभाषाऽकज्भिन्नभवेदितिभाष्येपुनरसंगतमेवेत्यतआह समुदायेति पदान्तरवेत्यस्यावयवमात्रस्यनिषेधा
भावादेवेत्यर्थः तथात्वेहिसर्वाद्यर्थकसर्वाद्येनतेनसमुदायस्यनित्यसर्वनामसंज्ञायामकच्स्यादेवेतिभाष्यासंगतिः अका
ज्भिन्नभवतीति ननुकृताकचासमासेनानेनविकल्पः अत्रातार्थकतेनासर्वार्थकत्वात् पूर्वेद्वन्द्वेजसिशीसर्वनामसंज्ञाविक
ल्पप्रादवयवकुत्सामादायाकच्विशीभावविकल्पघटितेरूपमित्यवयवकुत्सार्थकाकजभिप्रायकत्वमप्यकज्भिन्नभवतीति
भाष्यस्यसंभवतीत्याशंक्याह तत्रेति मानाभावाच्चेति अन्येतुदोषिनायनसूत्रेस्वरसर्वनामैकशृत्यादयोरेवाकशब्दयोरिवोदा ७१

मानेदान्नयोस्त्रशहृयोः सकृत्पठितेन ग्रहणे सिद्धे वचनेऽस्मिन्नुभयपाठः एकस्मात्स्थानिनो नैमाननिमित्ताहुः जराया जरसन्यतरस्यां अकृतपरि
माणस्येति परिच्छिन्नपरिमाणस्येत्यर्थः स्थानिवद्भावेति नचैवं स्थानिवत्स्यायामप्यपि वदितास्सो ह्यागमितुं यामाट्कस्यापि वा
देशापत्तिरितिवाच्यम् उक्तमुत्सर्गस्यानिर्दिश्यमानत्वा शास्त्रावपिपादः यदिनिसूत्रस्य भाष्यप्रामाण्येन सागमस्यानिर्दिश्यमानत्वाने
गीकारात् अन्येन निर्दिश्यमानत्वे स्वबोध्यावदितन्नेसति स्वबोध्यते तत्रसागमकेनतदेतेयनाऽऽदेशेन तस्यैवेति तत्र निर्दिश्यमान
परिभाषयाऽऽदेशावारणे यद्वा संहृपमित्येतद्भिन्नशक्तिग्राहकशास्त्रानन्तसेथानकालीनस्यानपेक्षितदेपजन्यापास्थितिविषय
तद्रूपनिर्दिश्यमानत्वामादेशेपि यदागमन्यायोपि शक्तिग्राहकएव अस्पष्टाविन्यादोजातिपदोऽपवायतः षष्ठ्युच्चारितानन
तन्तक्ष्मनिकत्वान्यतरनै तिसूत्रमित्युक्ति स्यादेशेकृतेन्नयादेशाशंकापरभाष्यप्रामाण्यादित्याहुः वेविभ्यायेति नवपदतभ्र
पोर्ईयोरनन्तसेथानेपिनिर्जरसेत्यादिसिद्धेरतस्तयोरलेखः अन्येनतदज्योमान्यामित्येतदर्थेस्यादिष्वित्यस्यावश्यपाऽऽवतयाद्दतद्
त्वादौजश्शसशेकायोयविभक्तिमपि पाठ्यमितिविशेषइतिवाच्ये तथासति शिवोवर्णइत्युदाहरणे प्रथमयोः पूर्वसवर्णेनादिवीसम
नयोरनुपपन्नत्वापत्तेः तदभावपक्षेतस्याग्रामेरिति अभावपक्षोपक्रमेपुनर्भावपक्षस्वीकारायोगादितिभावः तस्याग्रामेत
स्य जरसादेशस्याग्रामेरित्यर्थः पाठकस्तु तस्याग्रामेति पाठे सोऽकृतसेनिपातपरिभाषाया अग्राम्येत्यर्थमाहु यनितेवेदामिति

वि॰ नपुंसकद्वितीयैकवचने जरसभाव इत्येतदर्थमित्यर्थः भवितव्यमिति उक्तमिति शेषः प्रश्लेषश्चावश्यक इत्यजरमित्याहुः परेतु
त्वपपाठः विभक्त्यादेशानामिति पूर्वोक्तोपलक्षणयाम्नमशीभावोभयपरम् यद्वा नित्यत्वात्पूर्वं शीभावः जरसादेशस्तु न
७२ नित्यः शीभावे कृते त्वमितदयाभेरिति शंकापरिहाराय शीभावो जरसमपि विप्रतिषेधेन जरसः प्राप्तिरिति भाष्यकृतोक्ते नत्व
72 शीभावो जरसमेव जरसित्याशयेन अयं विप्रतिषेधोपन्यासः जरसोन्त्यासमबलतामभ्युपेत्य वस्तुतो जरसादेशः सर्वविधिभ्यो ब-
लवान् जरसोऽवकाशो जरसा जरसे इति सूत्रस्य भाष्यप्रामाण्यात् अन्यथा जरस इत्यत्र जरसादेशात्परमायाडापरतियाडिति
तदसंगतिः एवं च विभक्तिसंबंधिकार्यमात्रे पूर्वविप्रतिषेधेनैतस्य स्वकावकाशः जरसादेशस्य सर्वतः प्रबलत्वात् एतेन यद्वे
स्त्रियां जरसादेशे कृते इत्यारभ्य तेषां परत्वादित्यंतो ग्रंथो निरस्तो वेदितव्यः तथा च पुंसि निर्जरेण निर्जरसेत्यादिरूपं स्त्रियां जरायै जर-
स इत्यादि भवति न चैवं टाङसीति सूत्रस्यैकं पदासंगतिरिति वाच्यं वैकल्पिकत्वेन प्रथमे जरसादेशाभावे इनादेशे कृते पश्चात्त्वा-
प्तस्य जरसः सन्निपातपरिभाषया वारणमित्याशयात् न वाऽभावोपक्रमे पश्चान्नभावापन्नादरणे अन्यथा शिश्वियतुरित्यादौ
द्वितोनरे विभाषा श्वेरिति संप्रसारणापत्तिरिति वाच्यं इकारनिमित्तकस्य जरसोऽभावोपक्रमेपि इकारनिमित्तकस्याभावानुपक्रा-
मात् शिश्वियतुरित्यादौ तु शिशुश्चौव पश्चात्त्वहत्वेर्विशेषः नपुंसकद्वितीयैकवचने तु जरसादेशो भवत्येव अथेह तत्कस्मान्नम ७२

भवतिअति जरसंपश्येपतिभाष्यात् अम्लुकम्पोजरसःपरत्वाच्च नवल्लुकःसर्वेविधिभ्यःप्राबल्यंबहिरंगलुकपवतयात्नात् स्वमोरि
तिसूत्रस्येत्यदादिभ्यश्चेतिवक्तव्यमितिवार्तिकेमानेनेनभवतादित्यचलुकेबाधितात्तातङ् अतिजरमतिजरैरितिभवितव्यमितिवि
मभाष्येत्वप्रथमैकवचनविषये यनितेवेदंजरायाइतिसूत्रेभाष्येतथाहि अहेयेलुक्स्यात्रभवतिअतिजरसंपश्येतिसर्वेपा
दिणशंकितेततःपूर्वपदिणःस्यचविशेषः नाकृतेऽम्भावेजरसादेशःप्राप्नोतिकिंकारणमवीत्यच्यते नचायंपरिहारःद्विती
यैकवचनेप्यवाशिष्टइतिवाच्ये अनक्त्वोयात् किंकारणमवीत्यच्यतइत्येतएवविशेषप्रतिपादनपरोनात्रसः तस्यचायमाशयः
अतोमित्यम्प्रहतिंविनानजरसभावःसोहंलादित्वात् अम्भावेनलुक् अमावाधितत्वात् अमावाधितस्यापिपुनःप्रहतैात्ता
नमित्यत्रापितदापतिरिति नचजरसादेशार्थेसोरम्विधानेऽकारादेशविधानेनैवसिद्धावम्विधानवैयर्थ्यात् ततोद्वितीयैक
वचनेलुकेसमायनेमसिद्धौती यदाचजरसभावःकृतस्तदालुक्नभविष्यति सन्निपातलक्षणोविधिरनिमित्तमिति यदाचेतस्यामे
लुकेयबाधितापरत्वादितिशेषः ततःपुनःपूर्वपक्षीप्रथमैकवचनेहतीयावडुवचनेचशंकते यथैवमतिजरसाऽतिजरसैरिति
नप्राप्नोति अतिजरमतिपरैरितिभवितव्यमिति लक्षणानुरोधाज्जरसादेशविषयेसन्निपातपरिभाषानाश्रीयतइतितद्भावः ततः
सिद्धोत्याह गोर्नदीयथाह इष्टमेवैतत्संगृहीतमित्यादि किंकारणमवीत्यच्यतेऽअम्भावेकृतेसन्निपातपरिभाषयानजरसितिन।

वि॰
७२
73

योक्तपाठान्तरेतु भाष्यपुस्तकेषु क्वापि नोपलभ्यते सर्वग्रन्थासंगतश्च प्रथमैकवचने ऽतिजरसं तिष्ठतीत्यत्र लुक्कृते न शंकित इति
तटस्थेन शंकिते सन्निपातपरिभाषया जरसादेशाप्रवृत्त्योक्तरूपमेव युक्तमिति समाधानस्य पाठान्तरकल्पनयाभवदभिप्रेतस्य
प्रतिपादनायास्यात्र विशेषस्यासंगतेः तथा हि प्रातिजरसं तिष्ठतीति रूपे स्वीकृते विशेषमात्रमभिधित्सितमिति प्रतीयते
किं वास्यात्र विशेषः नाद्याकृते ऽम्भावे जरसादेशः प्राप्नोति किं कारणमवोच्यते ऽम्भावे कृते सन्निपातपरिभाषया न जरसिति
भवत्कल्पित सर्वभाष्येण प्रथमैकवचने ऽम्भावो नरमेव जरसं प्राप्नोति द्वितीयैकवचनेन तमादेशान्यागेव परत्वाज्जरसितिल-
भ्यते तत्र विभक्त्यादेशः सर्वविप्रतिषेधेनेति वदन्नस्तव विरुद्धम् यद्येवमतिजरसमतिजरसैरिति न प्राप्नोतीति भाष्यस्य भवद
क्तद्वितीयैकवचनाभिप्रायकत्वमपि न युक्तं यद्येवमिति पदस्वारस्येन पूर्वग्रन्थोक्तयुक्तिमुपजीव्येयं शंकेति प्रतीयते सर्वग्रन्था
र्थस्त्वोक्तरीत्या ऽतिजरसेषु शेषत्वादाव मादेशात्पूर्वं जरसः तदंगीकारे च द्वितीयैकवचने कथं सन्निपातपरिभाषया जरसादेशाभा
वः किं च द्वितीयैकवचने लुकि सर्वं पाक्षिकेणाशंकितेनातः परेण प्रथमैकवचने लुक्कृते न शंकित इति स्पष्टे ऽस्यात्र विशेष इति
सर्वं पाक्षिकेण विशेषप्रतिपादिते सत्यप्युक्तेषाय यद्येवमिति ग्रन्थेन तावत्सर्वं पाक्षिकेणः तेन जरसादेशमंगीकृत्यैव लुक्प्राप्यादनात्
नापि तटस्थस्य प्रश्नमेव तत्त्वेन संगृहीतमित्यग्रिमभाष्यासंगतेः प्रतिजरसैरित्युपन्यासासंगतेश्च नापि सिद्धान्तिनः तेन जरसा ७२

देशाभावप्रतिपादनद्वारेणोक्तरूपस्यैवत्वेऽनीयतयाऽतिजरसमिति न प्राप्नोतीत्यनिष्टापादनासंगतेः अत एव ङ्याप्ग्रहणेऽदीर्घ
इति वदिष्यमाणमयुक्तं अदीर्घपदेन दीर्घभिन्नजरसोऽपि ग्रहणात् दीर्घभिन्नस्य ह्रस्वस्यैव ग्रहणे तु विधायोजातमित्यत्रत्यादौ ह्र
स्वङ्याप्रि[illegible]त्वादिलोपयाऽऽगमाभावापत्तिरित्याहुः पद्दन्नोमास् अत्यजरसामित्यस्यानुकृतिं दूषयितुं तस्यानुकृत्याः
स्थानिनः प्राप्तिप्रत्ययनेत्युक्तमपि दूषयितुमाह शिरसो ग्रहणं कर्त्तव्यमित्युक्तमिति विकल्पानुकृतेर्दूषणान्तरमाह वा केशेषु
ति येयं तद्धितः स्यैव वाकेशेषिष्यारम्भेणास्य तरसो ग्रहणस्यानुकृतेर्हेतुरयमेरुकस्तु तानन्दनुकृते विकल्पनामयेत्यस्य सर्वथानत्या
त्वारितत्वकल्पैवेत्यायमिति भावः ननु पादादीति ह्रस्वनपापरश्च नप्रश्लेषश्रितामिमानेदम् जरसामित्यादौ नुडभावार्थं तत्प्रश्ला
षश्रित्याभिमानेनेदम् जरसामित्यादौ नुडभावार्थं तत्प्रश्लेषस्यावश्यकत्वमुक्तेन न विसर्गं लवम् व्याख्यानादिति अयं तत्प्रयु
क्तायस्येत्यत्रेति व्याख्यानात् भ्यौट्टकारेणैव प्रत्याहारेण तत्प्रतीत्वंकारेणेत्यर्थः प्रथमैकवचनमिति सप्तमीबहुवचनग्रहणेः
सर्वनामस्थानश्चिविषये स्यादित्यर्थः व्याख्यानादिति तद्गुणेरप्रत्ययाभावाच्च कप्रत्ययावधीत्युक्तोऽकप्रत्ययस्य न स्वादिषु
ग्रहणमिति प्रतीयते तत्राह तदेतेष्विति नपादोन स्तत्रस्य इति तत्र हि वेतस्वानिमन्त्र रुत्वमाशंक्य भवेतेन समाहितेऽत्रव
भसेत्यायायाहत्व प्रतिवेधातिरिक्तेन किंचित्कार्यम् वाक्यर्थेति ननु मर्यादार्थे काडाडवाधीदिति निर्देशोऽपि नकोऽपि दोष इति

वि॰ ७४ 75

वेन॥ समाहारे द्वंद्वबहुव्रीहिसंज्ञयोः समावेशापत्तेः वक्ष्युक्तमिति ननु तत्र वर्णगौरवात्पदगौरवस्य गरीयस्त्वादिति पा
ठकः संख्यावाच्येकशब्दोपादानादिति वस्तुतस्तु द्वीदितोनव्यवहारावपि स्थूलदृश्वानौ केवलार्थकैकशब्दस्यैवात्र ग्रह
णात् कैवल्यं हि सजातीयसंज्ञान्तरासमानाधिकरणत्वम् एकाकीतिप्रतीत्यादौ तथा प्रतीतेः ननु परत्वानवकाशत्वाभ्यामेव
काशत्वाभ्यामेव बाधसिद्धौ आकडारादेकेति व्यर्थमित्याशंक्याह आभ्यामेवेति परत्वानवकाशत्वाभ्यामेवेत्यर्थः अन्यथाकड
रीयविषयसंज्ञाभिन्ने लोके संज्ञया बाधाणसीति संज्ञायाः कृष्णादेवदत्तादिसंज्ञया हस्त्यश्वकादिसंज्ञाया बाधादर्शनादित्य
र्थः आकडारेइति तेन यत्र नु धा विप्रतीत्यत्र तनयेवमी विरोधाभावेनेत्यस्मात्तत्र तत्त्वात् पर्यायापत्तिर्दोषइति इदमयुक्तं
विप्रतिषेधेपरमिति परकार्यस्यैव ग्रहणात् बाध्यसामान्यचिंतयेति अत्र वसिनि चेति सत्त्वेमाने तद्भिमवदीयइत्यादौ यदन्तार्थे अ
न्तरंगत्वात्सिद्धे तमिति परत्वेन तद्धेयध्यं नन्वाकडारीयसंज्ञयोः कार्यकालत्वपक्षे एकदेशानुक्रमेण तथापरेत्यसंगतमित्याशंक्या
ह आकडारस्येति एकसंज्ञावेति पुरुषसंज्ञातिङ्षुपरस्मैपदसंज्ञाया बाधिकाः प्रवादत्वात् परस्मैपदसंज्ञा तशत्कसोस्व॰
रितार्थो तथा च परस्मैपदानामित्यनेन शतृकसोरेव णलादेशः स्यात् तस्य च स्थानिवद्भावेनोत्तमत्वाभावात्तदसंगतिरिति भाव ः
इदमुपलक्षणं तयोः समावेशोसि विहाडेरित्यपि ज्ञापके बोध्यं एकदेशिनएवेति इदमयुक्तं इशाहस्यनन्दंतसंज्ञायत्तेपिसमा ७४

नावधिकयालघुसंज्ञयापरत्वाद्बाधेनघिसंज्ञानापत्तेः घिसंज्ञानुहरिशब्देवपरित्वाद्यो न च भिन्नावधिकत्वेनद्वयोःसमावेशात् अ
स्यस्त्रीश्वश्रगुरुसंज्ञयाबाधेननदीसंज्ञानापत्तेश्च तस्मादेकसंज्ञेत्यादिनिर्देशेस्तयोःसमावेशोभवतावाच्यः सवसमेवर्णसंज्ञाप
देपि तथाहिवत्तस्तानित्यादौभसंज्ञायाश्चवादीदिपदित्यादौत्र्यभ्यासेकारस्यविसंज्ञायोदीर्घोलघोरित्यस्यैवयच्छीयत्वात्तद्वलेनतयो
समावेशकल्पनात् पंचमीसमासाश्रयणादिति परस्येत्येतदर्थोनभोवेणहृतिः पंचमीभयेनेतत्रपंचमीतियोगविभागेनभा
ष्यकृतानन्तरश्चत्वत्रपंचमीसमासाश्रयणादितिभावः दीक्षितेनपंचमीसमासोदाहरणस्यापीपवत्रित्यस्याविदिस्याहवेणलङ्
एवभक्तेजसमाश्रित्यान्यथासाधनात्पंचमीसमासस्यलङिःजस्तवारणप्रयोजनमाह तेनेति यत्तदेवेति एवंजातीयस्यले
जसोःनिष्ठमादेवेत्यर्थः इदमुपलक्षणं अविदत्रित्यादौसिजभ्यस्तेतिजुसभावोपिफलम् ननुभैरित्यत्रेकारोऽविवक्षि
तः तथावङितोभक्तस्यजुसित्तिवाक्यार्थः इतश्चेतीकारलोपेभक्तमात्रस्यैवङितादिनासंभावात् तथावश्यंपोषितत्रविदत्रित्यादौ
नदोषः भक्तस्यालहनितेनस्यानिवद्भावेनानेनत्वमशक्यत्वात् एवंचपंचमीसमासस्योदाहरणंमृग्यमितिचेत्सत्यं पंचमी
समासानित्यत्वेज्ञापकमाह अचिणश्चेति निष्ठायांसेटीत्यत्रसेड्ग्रहणमप्यत्रज्ञापकंबोध्यं तद्धिकारितमित्यादाविटि
कृतएवणिलोपायथास्यात्ततःप्रागितेनदर्थं सर्वेणिलोपेहिपकाजितनिषेधादिणनस्यात् पंचमीसमासस्यनित्यत्वे

वि॰ हि सर्वेणालोपे पित्रस्य स्थानिवद्भावादेवेण निषेधाप्रवृत्तौ तद्वैयर्थ्यं स्पष्टमेव केचिदित्यादि आडु इति नेनोऽपपाठः स्थानिवद्भा
७५ वलव्याकारस्यैव प्रविगणेत्यादौ व्यपदेशिवद्भावेन लब्धु पूर्वेत स्वीकारे अविकोर्षेत्यादावयादेशापत्तेः एतेनैव परिभा
75 षावारणायाह वाक्तिपरितेति इदमप्युक्ते नलुमतेति निषेधानित्यत्वेन स्थ्यपरत्वमादायतन्मतेपि सूत्रेण सिद्धिसंभवात्
तदनित्यत्वस्यागतिकगतित्ववत् शब्देनेनसादृश्यमादाय यदादिप्रवृत्तिरपि अगतिकगतिः भाष्यपठितेति इदमप्युक्ते नासि
काशब्दप्रयोगाभावायतदावश्यकत्वात् तस्माइति व्यवस्थायाइत्यर्थः नलुमतेति निषेधाऽनित्यत्वेन सर्वत्र स्थ्यपरत्वादि
तिभावः पादयतीत्यादौ पद्भाववारणाय स्थ्येवपदादयइति व्यवस्थार्थं तद्वारिताप्यदिप्रक्रमेतत् नन्वेवंसत्रैववैयर्थ्यं प्राप्नोती
त्यतआह तत्रापीति अनादेशेत्वेयोत्यर्थः आवश्यकत्वादिति एतेनपादशब्दात् हृदयशब्दात्तौतन्निमित्तकेपत् हृदादेशेस
न्निपातनपरिभाषयालोपलुकौनस्यातामित्यपास्ते ननुकोशेपत्हृदादिवत्तत्समासादयोपिकृतोनोक्ताइति चेत्रपदादीना
मिवतेषांसर्वनामस्थानप्रयोगाभावादित्यवेहि ननुकोशशब्दानोलोकप्रसिद्धशब्दानुकरणेनेनशब्दपरत्वादासिद्धकपदा
र्थोयइतिन्यायेनपदार्थप्रवृत्तिसंभवात्पदंघ्रिःस्त्रोतेहृदित्यादेःप्रकारार्थत्वप्रयोजनमोक्तिरसंगतेत्यतआह कोशेशब्दाइति अर्थे
परायवेति अर्थैकेनेरणेत्वप्रमाणाभावादितिभावः ननुतत्तदर्थेशक्तिग्रहस्यकोशाधीनत्वात्शक्तिग्रहमेनेरणार्थपरत्वासंभवा ७५

पुरस्कारेण

कोशस्य शब्दानामर्थपरत्वे शब्दविधानमदृष्टमत आह शक्तिग्रहाद्विति सामान्यत इति अर्थविशेषाश्रयस्मारणे इत्यर्थः इदं प
दमर्थबोधकं पदत्वात् गोपदवदित्यनुमानेन बोध्ये एवं चेति अनेनानुमानेन सामान्यतो विष्णुपदार्थोऽस्तीति ज्ञाने विष्णुपदश्रवणे
न तत्स्मरणे इत्यर्थः इति क्रमेणेति कोशस्य पर्यायेष्वेकं पदं विशिष्यार्थबोधकं विदितशक्तिकैकपदे पुरुषं प्रत्येव कोशस्य
शक्तिग्राहकत्वादत आह स्वस्वशक्तिरिति तन्मूर्तरूपस्येति कंचित्पुरुषं प्रति विष्णुपदमर्थविशेषे गृहीतशक्तिकमन्येन नारा
यणपदेन तथेति भावः अत्र भाष्ये प्रमाणयति अत एवेति इदमङ्गीकृत्याधिकरणस्य शोकरभाष्योपलक्षणम् तत्र हि सामानाधिक
रण्यं तन्त्रयोः व्यासेनापवादे नैकत्वेनेति अथ व्यासेन यथा इयं प्रतिमा विष्णुरिति अपवादेन यथा नेदं रजतमित्येकत्वेन यथा हि
जो न मोक्षस्य योगी भवेदिति विशेषणत्वेन यथा नीलमुत्पलमित्युदाहृतम् तत्रैकत्वोदाहरणे उक्तरीतिः स ह एव कोशतात्पर्या
दिति तथा च भेदाख्यानाय न द्वंद्वो नैकशेषो न संकरः कृतोऽत्र भिन्नलिङ्गानामनुक्तानां क्रमादृते इति कोशकारैः परिभाषिते अस्या
र्थः भेदस्य लिङ्गभेदस्य स्वरूपभेदस्य वाख्यानाय द्वंद्वैकशेषसंकरा न कृता इति लिङ्गभेदाख्यानाय ह्रादिनी वज्रमस्त्री कुलिशम्
मित्यस्य स्थाने कुलिशह्रादिनीवज्राः इति द्वंद्वः सहो बले सहा मार्गे इत्यस्यास्यापवादः भिन्नलिङ्गानामनुक्तानां क्रमादृते इति भि
न्नलिङ्गानामिति भिन्नस्वरूपाणामुपलक्षणं तेन समानलिङ्गानां समानस्वरूपाणां द्वंद्व एकशेषश्च कृत एव यथा स्वर्गना

वि०
७९
76

कश्चिदिवचिदशालयाइति पादाशरश्मश्रिततयोर्शाइतिच अनुक्तानामित्यनेनजनयित्रीप्रसूर्माता तातस्तुजनकःपितेतिस्यानो
तनिर्दिष्टानांद्वंद्वैकशेषौकृतावेव मातापितरौपितराविति एतेनत्वेनभःश्रावणोनभास्यस्त्वश्रावणोत्वनभसोइतिनकृतमि
ति मेजूषोक्तमपास्तं नभोनतरिदोगतंनभाःश्रावणिकश्चसहइत्येवेसस्यपर्यायेषुपठितत्वात् क्रमादितइति क्रमःप्रस्तावस्तं
विनासंकरोनकृतःसतिप्रस्तावेसंकरएव यथेंद्रादिप्रस्तावेमेरुःसुमेरुरित्येवमादिरूपेणगिरिवर्गादिम्यःकृष्यसंकरोनकृ
तः सतिप्रस्तावेसंकरःकृतः ननुविरूपदार्थाभिन्नोनानायणपदार्थइत्यादिबोधेएकशेषोनप्राप्नोति इष्वितइत्यादिनिर्देशेन
सहविवक्षायामेवतत्प्रवृत्तेरिसिवेन करीरादिपदार्थानामप्रसिद्धानां मिलितानांप्रसिद्धवदपदार्थेनयभेदेनान्वयेयदः करीर :
कलशइत्यादौकरीरादिपदानामेकशेषापत्तिरित्याशयात् पाणिनिनेति प्रकृतिवदनुकरणमित्यादि देशेऽनुकरणवदेकशे
षाकरणादितिभावः एतेनेति उत्तरपदेइत्यस्यसमस्तेतत्वाभावेनेत्यर्थः इत्यदेताः भाष्यानुक्ताविबुध्यइति एतेनध्यायतेर्थोरि
त्युपपन्ने ईतेनकृतमितोति इदमयायामेनवर्णाश्रयेप्रत्ययलक्षणमितिवार्तिकमतेन वस्तुतस्तुशश्लोकइत्यत्रबिपिर्शतापाद
नेनतावद्धार्तिकमतेन तेनईत्तमवकारादाविति निषेधारंभात् नापिभाष्यमतेन तेनवर्णाश्रयेप्रत्ययलक्षणनेनीकारात्
तदेतदभिप्रेत्याह श्रवेत्विति दीर्घेविधायकेति नन्वेवंरामानिमग्रदीर्घेकृतेश्रातोःनापइतिलोपापत्तिरितिवाच्ये श्रातोनापर ७९

ण्येनेनाकारेणादेशादिहितेभसंज्ञानिमित्तेशस्यपेलोपविधानेनादोषात् एवं रामाणामित्यादावपि वक्ष्यमाणरीत्यादीर्घं ज्ञातो
लोपेनेतिबोध्यं इत्यादेताः सुडतीति सर्वसूत्रेनस्यादीर्घे परत्वेपि शाह्यधिकारादत्र ह्रस्वपरत्वे ह्रस्व इत्यनेन सामानाधिकरण्या
न्वेरोधात् तदेतदभिप्रेत्याह अन्नहन्त्रुम्भ्यामिति अनवकाशत्वादिति ननु गवांपत्ये आद्यणेपृ इत्यत्र यतिः समासएवेति नि
यमेनाविनाअसहस्तौ चरितार्थो नदीसंज्ञामसैस्त्यादौपरत्वाद् घित्वेन बाध्यते अतएव ऊद्रुपधाया गोहः इति सूत्रे ऊदिति प्रश्लिष
माश्रित्य गोहः इति विकृतनिर्देशः प्रत्याख्यातो भाष्ये तत्रहि निगूहनृ इत्यत्र चरितार्थं सत्ते वापि मा शूहयतीत्यादौ परत्वाद्गुणे
ज्ञातयोर्दीर्घ ऊकारः इत्युक्तं निगूहतविनादौ गुणस्य शास्ति सतेषु तस्य तदपवादत्वमनाश्रित्येदं भाष्ये गृहार्द्रामिति सत्यमेवेति वे
त्सते नन्वधिकारादित्यसंगतं एतस्य परिभाषात्वात् अधिकारत्वेहि प्रतिसूत्रे संबंधकल्पनागौरवं बहुषु बहुवचनमिस्या॰
दौ तदसंबंधायसंज्ञकस्तृतिकल्पनेऽपि गौरवमित्यात आह वृद्धिस्यनादित्यर्थं इति सप्तत्येति शाह्स्वरूपेविशेषमप्याह
त्यतदेतविधिस्तकल्पनीयत्वादसाह इतिभावः नमनेरूति नमनेरित्यत्र नेत्यकारस्तूच्चारणार्थ इतिभावः वार्तिकविरोधादि
ति एवंपाणिनेर्वार्तिकविरोधस्यांकिं विकल्पत्वादिदमयुक्तं अमनावटेनेतिलद्वामिडुरिति नवनोयुक्तं नीतिनोक्तमिति ने
इतिनिर्देशस्तुशाह्स्वरूपस्य विशेषणत्वेन नपुंसकत्वमाश्रित्य तस्यापिनुमोपि ज्ञानगौरवमिति नत्वाडोनुट् प्रेसीतिस्यासौ स्तनम

बि॰ ७७

77

नेऽस्त्यत्र वचनमस्तीत्यविवक्षात्वासोऽक्षितिचेन्न अमुष्मैकुलायेत्यादौ मतस्यासिद्धत्वेन नत्वमापत्तेः ननु नुमविधिं प्रसिद्धत्वेपि स्मा
यादेशं प्रत्यसिद्धत्वेन मत्वात्पूर्वं स्मायादेशे कृते मः प्राप्तिरितिचेन्न अनेश्त्वादौ मतस्यासिद्धत्वेन सवर्णदीर्घे स्मैनादेशगुणयो
र्वावारणायनाभावेकत्वेऽपि कार्यमात्रं प्रत्यसिद्धत्वनिषेधावश्यकत्वात् सवर्णदीर्घे स्मायादेशयोर्नेम्विधिविकल्पविशेषात् पर
रूपेतेतरेगतान्नमात्पूर्वमेव प्रवृत्तेते नमनेऽस्त्यत्रमस्तीतिन्यासेतत्राङो नहृङ्गेसीतिसवर्णे न तस्येति आङिच्चतस्यासेत्वाव्ययनाः
श्रित्वाड्‌ेनादेशविधानादेवष्टकिलोपश्चत्वादौ विषयप्रत्ययस्याङ्गादेशो विधायतदीयङ्कारस्यनेत्वमित्यर्थः एवमोऽङ्‌इत्यत्रापि
दोष्यं वार्तिकमतेपीति अपिनाभाष्यकृन्मतेपि याटिकृते निर्दिश्यमानपरिभाषया शीभावस्य प्रवृत्त्ययोगपतेन त्वद्वायामिमा
दावादद्व भाष्यकृन्मतेपि निरवकाशत्वेनेति न पाठः पूर्वं शीभावप्रवृत्तेः केचित्तु गसैत्वमनेन सामानाधिकरण्याभावेनेतो ग
स्य निमित्तस्यौङः शीभावविधानात्कृतेपियाटि शीभावप्रवृत्तेः भाष्यकृन्मतेनकक्कौ डिन्त्यमापादेवशीभावेन याटोवाधइ
त्याशयइत्याहुः अल्विधित्वेनेति ननु ङकारस्य वस्तुतोऽनुबन्धत्वेनैतस्याप्यनुबन्धकार्यत्वमिति चेन्न तथासति प्रयत्नैस्तादा
विडापत्तेः क्त्वाप्रत्ययककारस्यानुबन्धत्वेन स्थानिवद्भावेन वलादित्वस्यासम्भवात् नन्वेवं तिविंशतेर्डिति श्विङ्क्रमस्य वमोर्शिति
अनुदात्तङित आत्मनेपदमित्यादावपीत्संज्ञार्थमिति चेत्सत्यं ङः सारित्येवेति न बहिर्वचननिर्देशात् ङः सोऽग्रहणस्यादितिवाच्यम् ७७

अतीमस्यानुहमादोषाभावात् औनस्त्वकारस्योच्चारणार्थत्वादित्यत्र संज्ञाविनैवनिवृत्तिः अतएवनस्वरितत्वमितिप्राचीनोक्तंदूषयितु
माह यदित्विति स्वभाववादस्य स्वभावतएवनिवृत्तिवादस्योभयथोच्चारणार्थत्वेऽस्येत्यत्रकेव नन्वपरस्त्वकालस्येत्यनेनऔकारएवविधे
धेयइति नविभक्ताविति शंकासमाधानेनिष्फलेइति वेत्सत्यं षनितइति तत्रहि नात्रलोपइतिन्यासेनेदितेत्यादौनलोपआपादितः
उक्तपरिभाषासत्वेनशहस्यप्रत्ययत्वाभावादेवनलोपाप्रसक्तौतदसंगतिः नेतिदिगिति ननुतपरस्त्वकालस्येत्यनेनौकारमात्रस्य
वतस्यतिप्राभावात्स्वरितत्वशंकातत्समाधानेइत्यपिनिष्फलेइतिचेन्न किमोदित्त्वात्पितयालापनोक्तेत्यत्रस्वरितत्वानापत्तेः यदिच
तदर्थंतिपरेतिद्व्यपरंतस्यप्रकृतेपितदापत्तेः नचमतेऽणेरित्यत्रस्यभाष्यानुरोधेनानुबंधविनिर्मुक्तपदार्थोपस्थितेर्गोकारेण
तित्यदस्यतद्व्यपरतस्यावश्यकत्वाच्च तदेतदभिप्रेत्यनित्यस्वरितमिति सूत्रेकैयटेतिनाप्रत्यायितसंज्ञार्थमेणसंज्ञोकप्यतइत्या
ह्लिति त्यदव्यपदेशआदेशस्येत्याद्युक्तं समुदायस्येति नानर्थकेतिपरिभाषानत्रैवसूत्रेभाष्येप्रत्याख्याता शस्येति आमइति
समुदायात्सर्वत्रेपीतिशेषः अदृष्टार्थमिति यत्तुपाठकेनोक्तंहल्ङ्याब्भ्यइतिसूत्रेहलेत्तानोमतिसौनामित्यर्थेहल्त्यादित्यादौ
याश्च्छ्रिशिष्टस्यलोपःस्यादितितन्न मतिसीनोतस्मादित्त्वतरस्येतिपरिभाषयायेतत्कल्पनेननिर्दिश्यमानपरिभाषाश्रहेतो
दोषाभावात् धात्वादित्यत्रहरिदीक्षितपादैः सर्वेषामट्गार्ग्यगालवयोरित्याभ्यामट्नेष्यतएवहल्ग्रहणात् वस्तुतस्तुगुणे॰

श्केरस्य सहलादौ सार्वधातुके रत्यर्थेङ्गुणे तदस्यत्रापि गुणाप्राप्तेः नवोऽगुणे तर्हि भाषितस्य सर्वे यण्स्यामिति वाच्ये सूत्रद्वयस्य विषयपृथक्
वि० स्यायाप्त्वाताप्तेः एवमदः सर्वेषामित्यस्य हलादेः सार्वधातुकस्येत्यर्थो पतौ ग्रन्थि ग्रन्थामित्यादावत्राप्तेः तस्मादश्केः सेत्रा
७८ सूत्रेद्वयार्थमिति द्वेधेति गोवक्षपणो बहुश्रेयसीत्यायर्थमिदं रामइत्यादाविति राजेत्यादौ तत्संयोगान्तलोपेन सिद्धिः यद्वा
78 हलुङ्याप्भ्यः किमित्यस्य ङ्याब्भ्यामिति किमर्थमित्यर्थः समुदायद्वारावयवप्रश्नेतात्पर्यात् इदितोरित्यर्थे इति संज्ञाविधौ
प्रयमानयोरेवोपयोगात् सत्वेवपवभिन्नाविडन्ताविस्त्वविते वर्णे संज्ञापदे सूत्रार्थमत्वातदन्त संज्ञापक्षेतेवक्रमाह
तदंतेति यत्नमध्ये बद्धायत्नमध्ये अतएवासाधुत्वादेव श्रायन्नासे दोषमाह सपतिनेति द्वितीयदोषमाह सुसरवेति
इदमुपलक्षणं पतिसुतान्वयानित्यादौ हेहेपीति पूर्वनिपातोपि पूर्वमासेन सिध्येत् उत्तरन्यासे च बहुसखिशब्दे घितेन सा
दित्यपिबोध्यं भाष्ये सप्तत्वादिति तथाच भाष्ये बहुषितिवक्तव्ये इहमाभूत् कियान्नूनवक्तव्ये किमेतत्परिप्रश्ने वर्तते परिप्र
श्नस्यानिर्ज्ञाते अनिर्ज्ञाते च बहुषु द्व्येकयोः पुनर्निर्ज्ञाते निर्ज्ञातत्वात् द्व्येकयोः परिप्रश्नात् परिप्रश्नाभावात्किमेवत्ता न्नास्ति
कुतः प्रत्यय इति सतेनात्सकिमः प्रश्नार्थकत्वात्प्रश्नस्य च संशयपूर्वकत्वात्संशयस्य च तत्तद्भावावधिकविषयकोटिकत्वात्तदै
कत्वद्वित्वयोरिव त्रित्वादीनामपि परिस्फुरणात् द्विजाइत्यादाविव सौजसितिविधिसूत्रगतेपरत्वमादायबहुवचने तथा चक० ७८

तिपुत्राइतिप्रश्नेदृष्टोपुत्राविनष्टानरेलोकेकुर्वंतीत्याह बहुगण नहिशब्देनेति इदमुपलक्षणं तेनषट्पंचदशसोप्यत्रज्ञापकः
यमपाठकेनोक्ते तेनषट्पंचदशसोनज्ञापकः कतिवाहत्याचरितार्थत्वादितितमव्यो भाष्यकृतातेनषट्पंचदशसेऽर्थवत्ताल्लिश
ह्यस्यग्रहणमित्युक्तेनविंशतिशब्दएवतेनषट्पंचदशसप्रवृत्तेः कतिशब्दात्तकानिष्टएव स्पष्टेवेदंभाष्येइति तथाचभाष्यम्
अथवामहतीयंसंज्ञाक्रियतेतत्करणएतत्प्रयोजनं अन्वर्थसंज्ञायथाविज्ञायेत संख्यायतेनयेतिसंख्या एकादिकयावापि
संख्यायतइति ननुमहासंज्ञाकरणेनतदर्थानुगुणसंज्ञित्वकल्पनातोप्रदेशेषुलोकप्रसिद्धार्थावगतिस्तत्कृतइतिचेन्न तद
र्थानुगुणानांवक्ष्यमाणसंज्ञित्वव्याहतिसंभवात् नियतविषयपरिच्छेदहेतुत्वा भावेनबह्वादीनामन्वर्थसंज्ञानुगुणा
त्वागतामहासंज्ञाकरणेनप्रदेशेषुलोकप्रसिद्धार्थावगतेःकल्पनात् एतन्मायोपयोगः कृत्रिमाकृत्रिमन्यायोपयोगः अ
भ्यासाद्वेतितेति ननुमहासंज्ञाकरणेपिनलोकप्रसिद्धार्थस्यग्रहणेपेक्षिकैःप्रयोगेपिअभ्यासादिकार्यापत्तेः ननुसंख्या
पदेनलोकप्रसिद्धार्थग्रहणेसूत्रेबहुगणयोर्ग्रहणमनर्थकंतयोरपिसंख्यावाचित्वादित्याशंक्याह सूत्रेइति अतएव बहुता
देःसंख्यात्वाभावादेव इदमुपलक्षणं बह्वादीनांग्रहणंशक्यमकर्तुंज्ञापकात्सिद्धमितिभाष्यस्यबह्वादीनांसंख्यावाचकत्वे
ज्ञापकवैयर्थ्यम् ननुबहुतादेःसंख्यात्वाभावेएकादिकयावापिसंख्यायतइतिभाष्यविरोधः तत्रापिशब्देनबह्वादीनामपि

वि॰ ७५

ग्रहणादित्याशंक्य समाधत्ते यतीत्यादिना स्वव्याख्येति तथा च स्वव्याख्यत्रित्वादिद्वारा बह्वादीनां संख्यार्थकत्वेपि साक्षात्तद
भावइति भावः कैयटोक्तं दूषयति यत्तेनेति नियतविषयपरिच्छेदहेतुत्वाभावेन बहुत्वादीनामसंख्यात्वेनेत्यर्थः अथवा
महतीयं संज्ञा क्रियत इति भाष्यमुपादाय कैयटेनोक्तं न तु महत्याः संज्ञायाः करणात्संख्यैव वैपुल्यवाचिनोर्बहुगणयोः संज्ञा
मा भूदेकादीनां तु कथं स्यात् नैष दोषः संख्येति योगो विभज्यते तत्र चान्वर्थसंज्ञानुरूपः सर्वः संख्येत्याश्रीयते ततो बहुग
णेत्यादि इदं संख्यादिवाहृत्यर्थं नियमार्थं व्याख्यायते ऽन्वर्थसंज्ञाश्रयणादेव संख्या वैपुल्यवाचिनोर्बहुगणयोः संज्ञा नेति न
नु महासंज्ञाकरणसामर्थ्याल्लौकिकसंख्यायामपि प्रदेशेषु ग्रहणमित्युक्तं संख्यैव वैपुल्यवाचिनोर्बहुगणयोः संज्ञानिरासार्थे
न तत्सार्थक्यादित्याशंक्याह संख्येति यद्वा लोकप्रसिद्धसंख्यावाचित्वस्य बह्वादिष्वभावइति सर्वं मत्कृतेनान्वर्थसंज्ञाबलेन संख्यैव वैपु
ल्यवाचिनोर्बहुगणयोर्व्याहतिरिति वक्तुमशक्यं एवं यतिशब्दोपि इत्येतेन संज्ञिकोटौ निविष्टो न च व्यावर्त्येतेत्याशंक्याह सं
ख्येत्यादिनेतल्लब्धमित्येतेन यतयेऽइति संख्यापदानुवृत्तिरप्युणादीनां व्युत्पत्तिपक्षसज्ञापिका अतो न संकरइति वस्तुतस्त्वनेकसंज्ञा
करणसामर्थ्यादाकडारीयत्वाभावेपि नासां संज्ञानां समावेशः लोपसंज्ञानां सर्वविषये प्रवर्तनं तथैव बाधकाभावात् नह्येतावता
लोपसंज्ञाप्रत्ययदर्शनमदर्शनं विहितानां तादर्शनमात्रे एकसंज्ञोद्देश्यकानेकसंज्ञानां तथैकसंज्ञाकरणसामर्थ्यात्प्रयुक्तः स ७५

मावेशः नलुमतेति निषेधारंभाच्च लोपसंज्ञैव तासां विषये प्रवर्तते ननु यथा लोपसंज्ञा एतासां विषये प्रवर्तते तथैता अपि लो
पसंज्ञाविषये प्रवर्तेरन् तथा च गोमती गोमतीसंपन्ना गोमतीभूते त्यत्र स्वे लोपे तन्नलुकतद्धितलुकीति ङीपो लुक् प्रसज्येत किं
दभिदित्यादौ श्लाविति द्वित्वं प्रसज्येत नैवः किंपक्षादर्शनस्य लुक्श्लुसंज्ञाप्रवृत्तेः देवशक्यस्याति लोपे प्रत्ययतव्याप्यपमेशुरा
स्कारेणैव प्रत्ययस्यापवादनादिति चेन्न पृथक्संज्ञात्रयविधानसामर्थ्येनासां स्वभिन्नसंज्ञासामान्यविषयेः प्रवृत्तिकल्पना
त् लोपसंज्ञायास्त्वासां विषये प्रवृत्तिरूपयादित्येव अनयव प्रत्ययादर्शनेन लुमत्संज्ञा प्राप्नोति तत्र को दोषः तत्र लुकि श्लुवि
धिप्रतिषेधः नवा पृथक्संज्ञाकरणात् यथैव तर्हि अदर्शनसामान्ये लोपसंज्ञा लुमत्संज्ञा अपि लोपसंज्ञा अवगाहेरन् तत्र
को दोषः गोमतीत्यत्र लुक्तद्धितलुकीति ङीपो लुक्प्रसज्येत ननु चात्रापि नवा पृथक्संज्ञाकरणादित्येव सिद्धं यथैव तर्हि पृ
थक्संज्ञाकरणसामर्थ्याल्लुमत्संज्ञा अपि लोपसंज्ञा नावगाहते एवं लोपसंज्ञापि लुमत्संज्ञा नावगाहते तत्र स एव दोषः लु
क्युपसंख्यानमित्यादि भाष्यांकं संगच्छते नवा पृथक्संज्ञाकरणादिति भाष्यस्य तद्भावितसंज्ञाभिप्रायकत्वेन गोमतीत्यत्र
लुक्तद्धितलुकीति लुगापादनपरभाष्यं यथैवं तर्हीत्यादि तदुत्तरभाष्यं वासंगतं स्यात् तद्भावितसंज्ञाश्रयणे गौरवं च विहि
तविशेषणमिति अत्र वदंति एवं सति परमकृतीत्यत्र षड्भ्यो लुगिति लुगनापत्तिः इत्येतस्य षट्संज्ञाविधानात् नवायेस

वि॰
८०
80

मासमप्येवड्लैभः दिक्संख्ये संज्ञायामिति नियमादिति वाच्यम् दिक्संख्ये समानाधिकरणविशेषणत्वेनोपादाय प्रवर्तमानसमा
ससंज्ञायामेव तेन नियमेन व्यावृत्तेः अत एव सप्तर्षिवादिसूत्रे परमपदेष्वेति प्रयुक्तं भाष्ये नवबहुगणेऽदितिवेमनयोर्हि संदेतविधि ः
अति कृतयश्चाप्यपि षट्संज्ञायोल्लगापत्तेः बहुगणादीनामसंख्यात्वस्य तयास्वीकृतत्वेनान्वर्थसंज्ञाबलेन संख्याषट्संज्ञयोरु
कस्थले वारणासंभवादिति अधीयेति आङ्ग्येयम हनइत्यात्मनेपदे विधिलिङुत्तमपुरुषैकवचने इट् गमहनेत्युपधालो
पः सीयुटः सकारस्य प्रत्ययावयवस्य लोपे प्रत्ययलक्षणेन झलादिप्रत्ययपरत्वेनानु नासिकलोपवारणाय च प्रत्ययग्रहणेन
सिद्धे सति कृत्स्नप्रत्ययलोप एव तत्प्रवृत्तेर्न दोषः ववितार्थमिति प्रत्ययावयवे प्रत्ययत्वस्वीकाराभावेन प्रत्ययरूपसत्वाभावेन
षत्वाप्रवृत्तौ सातिग्रहणं व्यर्थं स्यात् ननु प्रत्ययरूपसकारस्याप्रसिद्ध्याप्यसंभव एव कुतो नोक्तः अवैषीदित्यादौ आदेशरूपत्वेन
वषत्वसिद्धेरिति चेन्न इड्भावत्वसंवादयन्तादित्यत्र वा हि यजिभ्यां लेटि सिपि प्रत्ययरूपसकारसंभवादित्यापीति भाष्ये तदाहे
ति अतिदिश्यमानकार्याणामस्यानिर्देशाप्यवदेशा इत्येतत्प्रमेयमेवेत्यर्थः प्रत्ययलोपइति गुणप्राप्तेश्चानिवृत्ते यजसिवेतिगुण
प्राप्तस्तत्रैतन्न तद्बवे न लुमताङ्गस्य लुप्तप्रत्ययपरतायाः सर्वेइत्यस्य फलमाह तेनपंचेत्यादाविति वार्तिकमतेनैतत्सूत्रोदाहरण
माह राजपुरुषादाविति सर्वमतसाधारण्येनैतत्सूत्रोदाहरणं त्वकारीत्यादि लघ्वांगसंज्ञकश्रत्यस्य प्रयोजनमाह अंगसंज्ञा ८०

त्विति अन्यथांतरंगानपीतिन्यायेनांगसंज्ञातः पूर्वं लुक्प्रवृत्तौ यथोद्देशेऽपि समानत्वादिति भावः अत एवेति अंगसंज्ञाया उक्तरीत्या न
लुमतेति निषेधाप्रवृत्तेरेवेत्यर्थः स्त्रीप्रत्ययलुकीति इदमुपलक्षणं तथाहि इदं स्त्रियां वेत्यत्र स्त्रीई इति प्रश्लिष्य ईकारे परतः
स्त्रियां तृज्वद्भावः अत एव तापकान्त्र्मेतान्ङीषिति भाष्योक्तपक्षोऽनयाभिप्रायेणापेक्ष्यः आहो स्वित् स्त्रियां क्रोष्टोरंगस्य तृज्वद्भा-
व इति पक्षोऽनयाभिप्रायेणानाद्यः स्त्रीप्रत्ययलुकि प्रत्ययलक्षणेन ईकारपरकत्वस्य न लुमतेति निषेधे जागरूके सत्यसंभवेन तत्त्व-
देऽपि एव क्रोष्टू इति रूपस्यैव दुर्लभत्वात् नोक्तः तदेवं तृज्वत्प्रवृत्तेः पूर्वं स्त्रीप्रत्ययस्यैवाभावेन तल्लुकः विप्रत्यागेपायमानत्वात्
तस्मात्पंचभिः क्रोष्ट्रीभिः क्रीतं कुलमित्यर्थे ठकि तस्याऽध्यर्धेति लुकि पंचक्रोष्टु इत्यत्र तृज्वत्त्वमिति वक्ष्यमाणं वस्तुतस्तु पंचभिः
क्रोष्ट्रीभिः क्रीतं कुलमित्यर्थे ठकः पूर्वं तृज्वत्त्वविनाशकत्वाभावेनेति वक्ष्यमाणं अंतरंगत्वात् अंगसंज्ञाया लुगनन्तरमपि प्रत्य-
यलक्षणेन प्रवृत्त्या लुकोऽन्तरंगत्वत्वाविनाशकत्वाभावेनांतरंगानपीतिन्यायाप्रवृत्तेः अंगस्य क्रोष्टुरिति अंगस्यावयवोऽयः
क्रोष्टुशब्द इत्यर्थः अंगसंज्ञा च भवति प्रत्ययलक्षणेनेति न चेदं भाष्ये पंचभिः क्रीतैः रथ्यैः पंचभिरथ्यै इत्युदाहरणे प्रवृत्तेनैव
श्रूयमाणमिति समाश्रितांगसंज्ञा भविष्यतीति न प्रत्ययलक्षणोपयोग इति चेन्न तस्य पंचक्रोष्टु इत्युदाहरणोपलक्षणत्वाद्दोषा-
त् तथा चोक्तदिशांतरंगत्वेन तृज्वत्त्वस्य समाससंज्ञातः पूर्वमेव तृज्वत्प्रवृत्त्या न प्रत्ययलक्षणोपयोग इति वाच्यं अंगसंज्ञा तु भव

न्वि ३ क्रोष्ट्रीभिः ३

वि॰
८१
८१

तीति भाष्यस्य स्वकोन्तरङ्गनिमित्तविनाशकत्वाभावस्य संपादनार्थत्वेनादोषात् नियमत इति नन्वेवं तत्रान्तरस्यापि परनिमित्तकत्वेनान्त
स्मिन्नलमन्तेति निषेधप्रवृत्त्यापत्तेरिति चेन्न नलमन्तेति निषेधव्याख्यानेन शाब्दतः परनिमित्तकत्वस्यैवाश्रयणात् अत एवेति आदित्व
शाब्दतः परनिमित्तकत्वस्यैवाश्रयणात् अत एवेति अदित्यत्र शाब्दतः परनिमित्तकत्वानाश्रयणेन नलमन्तेति निषेधाप्रवृत्तेरेवेत्यर्थः
इदमयुक्तम् अन्तःप्रवृत्तावपि गुणे यङ्लुकोरिति निषेधेनेष्टसिद्धेः यत्तु वर्करीत्यत्र जर्वोरित्यादौ न योऽस्ति पूर्वनिमित्तकोऽन्तरङ्गत्वमाश्र
यान्तप्रवृत्तेरिति पाठकेनोक्तं तन्न अङ्गाधिकारस्याभ्यासकार्ये ग्रहणमभ्यासो गोऽभयनिमित्तप्रत्ययपरत्वप्रवृत्तेः अत एव जिह्रनीयिष
तीत्यादौ न कुत्वं कार्यकालत्वस्याभावाच्चेति इदमयुक्तं कार्यकालं मे ह्यापरिभाषेमस्येत्युपाविष्ठितमिदं भवति यविभमसित्वायने
कभाष्यविरोधात् कैयटोक्तेर्दूषयति यत्तेनेति अकडारस्यस्य कार्यकालत्वाभावेन प्रत्ययइत्यस्याहत्तिविनैवोक्तदिशा निर्वाहेण
वेत्यर्थः यदेकवाक्यतयेति यङ्लोगामिति अयन्तेनत्रयस्यान्यप्रत्ययइत्यपतिष्ठते इति सूत्रार्थाश्रयणात् अस्मिन्पक्षेऽपि प्रत्ययइत्य
स्याहत्तिर्नापेक्षिता अङ्गादिमप्रत्ययनिमित्तमिति नलमन्तेति निषेधस्तु अनादिमप्रत्ययनिमित्तकार्य एवेति वर्करीत्यादावत
प्रवृत्तिरिति भावः अनङ्गपत्यादिंसमिति इदं च विशेषणतया वाग्णो आश्रयणे प्रत्ययलक्षणेन भवतीति वार्तिकमतेन दूषणेन वस्तु
तः अयास्तमिति वस्तुतस्त्वाकडारीयेष्वपि कार्यकालपक्षस्योपपादितत्वात्कैयटोक्तमपि युक्तं आह तिरण्यावश्यकी अङ्गसंज्ञा ८१

यामप्य दीर्घायाः परत्वे इरंगसंज्ञायामप्यदीर्घत्वेनोपदेशस्य प्रत्ययनिमित्तत्वात् कुलालपितृचैवं प्रतीक्षब्राह्मणस्यपुत्रे
पेष्यानेष्वक्तीत्यादौ ब्राह्मणस्य प्रश्नक्रियां प्रतीवान्यथासिद्धत्वात् स्वमोर्नपुंसकादिति सूत्रे इति एतत्सूत्रोत्तरवर्तिनीनेनरा
च्छंदसीति सूत्रे इत्यर्थः पदांतरसन्निधानेविनेति वक्तृतोऽलिंगेयुष्मदस्मदोस्तस्यदाबभावोपपादनार्थं ग्रहणमनेनैदृशार्थे
कत्वेनयुक्तं नवाऽस्युतरत्यादौ पदांतरसंनिधानेविनाक्रियावर्तमानेदाबित्यर्थः इतिवाच्ये मानाभावात् नषडित्यत्रषट्ग्रहणं
वैयर्थ्यापत्तेश्च तस्मादलिंगेयुष्मदस्मदोनिवार्तिकेकस्यविशेषेर्मतमाश्रित्यप्रवृत्तमितिबोध्यं उच्चारणार्थेतच्छंकावारणायेति
इदमप्युक्तं त्रयोदशेत्यादौ सोतादेशविधायके त्रेस्त्रयइत्यादाविवात्रापिसोतत्वभ्रमवारणेभवात् श्रम्पुत्रयायेति भवामीति
प्रत्युदाहरणस्यापिनिर्देशत्वादितिभावः केचित्तुनमः शर्वं परत्वात्तत्वदायते पश्चाडगिदवामिति नुमित्तवेनामस्थानेवतिदीर्घे भ
वानितिसिध्यतीत्याहुः तन्न नलोपापत्तेः मैत्रलेनानामेवागितां नुम्विधानाच्च अन्यथाविनागितिमापत्तेः अपरेतु इदंजातिप
दे व्यक्तिपदेत्वत्वसेतस्येति सूत्रेऽस्याप्यतीनुपस्थितिसामर्थ्यान्नैतनमदादीनामत्वस्यशाप्तिरितिशंकास्यात् अतोभवंत्तावि
त्ययास्त्वमित्याहुः इतिइदंतः इदंतेभ्य इति वातप्रमवीन्मायातोः क्विपोनभिधानमित्यर्थः वातप्रमीशब्दाद्वावारक्विबेताकत्वेरि
किविग्रत्ते मृगाकृतिरिति हरिणाकृतिः इत्स्यादौ दीर्घाजसिचेतिनिषेधमाशंक्याह वाछंदसीति म्नलविभजादित्यइति

ऊ४

आतोनुपसर्गे कः इत्यनेन तत्र उपसर्गत्वात् अतएवयस्मिन्दश सहस्राणि पुत्रे जाते गवां ददौ वस्त्राणेभ्यः क्रियाख्येभ्यः सोयमे
वि॰ केन जीवतीति सिद्धं शाखान्येन तद्बोधकत्वनिवेश इति नन्वेवं कुमारीवर्णाभ्यां शाह्ने नदीसंज्ञा डर्वारा विशेषणत्वान्नित्यस्त्रीलिं
८२ गार्थबोधकत्वादिति चेन्नत्वने अवयवस्त्रीविषयत्वात्सिद्धमिति वार्त्तिकस्य यथोद्देशपक्षाभिप्रायेण प्रवृत्तेः तथाचावयवस्त्री
विषयत्वात्सिद्धमिति भाष्यमुपादाय कैयटेनोक्तं येन रंगतानात्सर्वं रूपमेव स्त्रीत्वेनात्यहृतानदीसंज्ञा प्राड्यजायमाने लिंगान्त
रयोगेन निवर्त्तत इति आकरस्थेन्यारभ्य केषांचिन्मते कार्यकालपक्षाभावादित्यन्तरं अवयवस्त्रीविषयत्वात्सिद्धमिति तयथोद्दे
शपक्षाभिप्रायकमेवेति शेषः कथमिति पौर्वापर्याभावादिति शेषः भाष्ये स्पष्टमिति वस्तुतो नैव भाष्यकृतोक्तं
किं त्वेवार्थी नो ह्रस्वः नदी ह्रस्वयोर्न्यासे जसि चेति न याच्यपि गुणः प्राप्नोतीत्याशंक्यैवं तर्हि योगविभागः करिष्यते ततो ह्रस्वो
वार्थे नद्योरिति वर्त्तते अनयोर्ह्रस्वस्य ह्रस्वो भवति किमर्थमिदं गुणो भविष्यतीति तद्बाधनार्थं ततो गुणः अगुणो भवति ह्रस्व
स्येति अथवा ह्रस्वस्य गुण इत्यत्रैवार्थे नद्योर्ह्रस्व इत्येन दत्त्ववर्त्तते इत्युक्तं वक्तुमशक्य इति एवार्थे नद्योर्गुण इतिन्यासे ने
त्ययोः गुणः स्यादेवेति अनित्यस्य लेलद्वैकवद्वक्कताया आवश्यकत्वेन नत्नमत्वेन्यासेनस्यां हेतो बीजाभावान्नदी साह
वर्यात्स्त्रीलिंगस्यैवावार्थस्य ग्रहणादनः शाह्ने गुणप्रसंग इत्यभावाच्चेति मौनि श्री कृष्णभट्टाः अयं ह्रस्व इति विधानसामर्था ८२

ध्येलभ्यो भाष्योक्तयोगविभागलभ्यो वा ह्रस्व इत्यर्थः ह्रडिवारणायेति नचांतरंगायां हृडौ बहिरंगस्यात्तस्यासिद्धत्वे नाजा
नंतर्यं इति निषेधात् पररूपं बाधकमिति न वाड्विधानसामर्थ्यं ङेराम्नड्बाधनार्थे चरितार्थत्वात् यत्त्वेवं सति
ह्रस्वनद्यापो नुडिति स्यात्तेन रं ङे नेत्येव स्यादिति मौनि श्रीकृष्णभट्टाः तन्न षट्त्रिचतुर्भ्यस्तत्र रस्त्रे शुनेत्यस्यानुवृत्ति
प्रसंगात् ननु ह्रस्वनद्याप इति सूत्रे आडेरिति पाठ्यो अथवा ङेरामनुडकारानुबंधविशिष्टः कार्यः तथा चैवं लघुमासेन सिद्धे
ड्विधाने पररूपबाधनार्थमिति चेन्न सर्वीशाह्वानस्ये ङे टि पररूपे पित्स्य पूर्वस्मात् ह्रियौ स्यानिवर्तेन त्वेतादित्वतापहत्यर्थेन
ह्रियाने स्यादित्याशयात् अनं कार्यवेति अनवकाशत्वेन बाधे यवादपहत्यत्रर मुत्सर्गप्रवृत्तेरेवेत्यर्थः किंतस्मिन्नव
काशत्वादिति अलोंत्यपरिभाषिकवाक्यतया गणेरेमस्येत्वमित्यर्थेऽनवकाशत्वमिति भावः वस्तुतस्त्वेवमप्याश्रयणेना
नवकाशत्वापयादनेऽभ्यासविकारे बाध्यबाधकभावो नेति परिभाषाश्रयणेपि हलादिः शेषो न स्यात् इत्यस्याकरी
मानिर्विषयत्वापत्तेः तस्माद्युगपद्द्वयोरसंभवेऽनवकाशत्वं यथाऽग्रामो रामः ड्रिदुवनापहारकत्वेनागामिनष्वासत्वेन युगप
तयोः प्रवृत्त्यसंभवात् न्वक्दीर्घयोस्तु युगपत्प्रवृत्त्यसंभवः दीर्घेण सर्वस्यागामिनो नापहारात् इहहलादिः शेषयोरपि नयु
गपत्संभवः एकस्य स्थानिन आदेशद्वयासंभवात् प्रक्रियावासनावतोऽईते हि रूपांतरशान्तिः लोपः सर्वथा निहन्तिरिति

तथा च लोकेपि ब्राह्मणा भोज्यंतां माठरकौंडिन्यौ परिवेविषातामिति भोजनपरिवेषणयोर्युगपदसंभवेन स्वप्रवृत्तिसमये भो-
वि॰ ८३ जनबाधेपि परिवेषणानंतरं माठरकौंडिन्ययोर्भोजनं दृश्यते हयवरट्सूत्रे च भाष्ये नेदानीं तौ भुंजाते इति कालविशे-
षप्रदर्शनेन व्यक्तं ते च्छ्वोरिति परिवेषणानंतरं माठरकौंडिन्ययोर्भोजनसूत्रे च भाष्ये ऊठहिते ऊडुनरं वलोप ऊठः ऊठ्वलोपयो-
र्युगपदसंभवादिति दिक् ननु ड्वगमादीनामिति वार्तिकनिष्पन्नभ्रूशब्दस्य धातुत्वादेव सिद्धे तदुपादानं व्यर्थमत आह
भ्रूशब्दस्येति स्वभुवाविति सिद्धमिति तथा च प्रयुज्यते गृह्णस्वितरहस्यविभेदः स्वभुवा परिहितैर्यपरिहारस्य इति एवमिवा-
र्णाव र्णात याते तस्यो गसेत्यर्थात्स्त्रियाविति ताद्दशविषयक सिद्धिः न भवतीत्यत्र यथाक्रियान्वयेन प्रसज्यप्रतिषेधशंकां नि-
राकरोति धात्ववयवसंयोगपूर्वं भिन्नश्रुति उदियादिति उत्पूर्वादीङ् गतावित्यस्मात्क्विपि रूपे इत्यर्थेन सिद्धेरिति वस्तु-
तस्तु संयोगाभिन्नान्त्ययोगैकदेशानङ्गदिति समुदायाद्दापरस्य संयोगपूर्वकस्यापि यणापत्तेः धात्ववयवसंयोगात्परस्येत्य-
र्थेन तु दियादित्यादौ दोषः पर्युदासाभावेनोक्ताक्षीलाभादिति पूर्वग्रहणमावश्यकं किमिति पूर्वसूत्रात् ह्वोरित्यनुवृत्त्या
सिद्धमित्याशयः निषेधादिति ननु खरकुटैः ब्राह्मणे इत्यादौ शाकलेशाप्नोतीति चेन्न उत्तरपदत्वेति वार्तिकारंभेन त्वामा-
वपि प्रत्याख्यानपक्षे तदप्रवृत्तेः प्रतिपदोक्तत्वादिति तथा च उर्वियादिमत्र बहुव्रीहौ यणेनेति तदाशयः विशिष्टरूपो ८३

पादानविषय इति दिक्समास इति वक्ष्यति समास इति विशिष्टैकपोपादानेऽसमर्थः इति विग्रहाभिप्रायेति प्रकृतेऽध्यायतीति वि॰
ग्रहे तन्नित्यत्वाभावः सत्त्वभूतार्थकेति अड्यातनर्थविशेषणेनेति कर्मकारकत्वमस्येवेति भावः सूत्रारंभेऽपीति भयहे
तुरिति हेतुपदस्वारस्यात् तथा च समासारंभेऽपि षष्ठीसमाससंभवान्नोक्तस्यलेयणेति भावः अभ्युच्चयेति पूर्वपरिहारेऽरुच्य
भावादिति भावः अनयोरेव निषेध इति तथा च सुप्सुपा समासनिषेध प्रवृत्तिर्नेति भावः अकारोत्तरमाह स्रुपीति वेति यलोपे समस्त्व इ
ति यावत् अर्थे तेलोपयोर्योरित्यस्य प्रवृत्तिसंभावनातावनर्थे तेवेरप्तकेति लोपो न प्रवर्तते नन्वनः क्व इति निषेधः देशांतविषयकोऽनु
नासिकोत्विषयो वास्यादित्याशंक्याह सति बाधक इति न्यायाच्छब्दानुरोधाच्च सामान्यापेक्षत्वस्याह नः क्व इति परपदस्याजादेशः
सैवेति अपीपवन्निति पंचमीसमासप्रयोजनप्रदर्शनपरभाष्यप्रामाण्यादिति भावः अनित्यत्वादिति अंतरंगपरिभाषाया
अनित्यत्वेनैव निर्वाहे नाजानंतर्ये परिभाषानाश्रयितव्येति मतेनेदं नन्वल्लोपस्य स्थानिवत्त्वाद्यणाश्रमे कौल्लुमेन स्थानिवद्
भावेऽगते लोपस्य लोपकर्मत्वाभावादित्यत आह भावेक्त इति अस्मादेव भाष्यप्रयोगात्क्वाविंत्यकर्मकेभ्योऽपि भावे क्तो भव
ति पत्रप्रयोगस्य नगात्येन रमेति भावः नन्वेवंविज्ञायते कौल्लुमे न स्थानिवत्कथं तर्हि क्वौ विधिं प्रति न स्थानिवदिति न पदां
तसूत्रस्य भाष्यात्कौल्लुमेन स्थानिवदिति नास्त्येवेत्याशंक्याह अस्यार्थमेति तथा चोक्तभाष्ये सर्वत्रैवेविज्ञायते कौल्लुमे

वि॰
८४
84

